



भगवता परराज्याक्रमणतः भारतस्य रक्षणार्थं निर्मितं प्राकृतिकं दुर्गम् इव स्थिता उन्नता हिमालयपर्वतश्रेणी। तत्र कस्यचित् पर्वतस्य उपरि स्थित्वा सत्यानन्दमुनिः परितः दृष्टिं प्रसारयन् अस्ति। अधोभागे प्रसृतस्य हिमराशेः मध्ये उदितस्य सूर्यस्य सुवर्णवर्णाः किरणाः कान्त्या प्रकाशमानाः सन्ति। पर्वतमूले काश्चन लघुनद्यः,विशालः प्रदेशश्चापि दृश्यन्ते स्म। एषः प्रदेशः दुर्गमः चेदपि रमणीयः आसीत्।

मुनिः पूर्वस्यां दिशि दृष्टिं प्रसार्य उदयन्तं सूर्यं मनसा नमस्कृत्य खाते दृष्टवान्। तस्य प्रदेशस्य रमणीयतां पश्यतः मुनेः मनसि विविधाः भावनाः। 'अहो भगवतः महिमा! रामणीया प्रकृतिः सृष्ट्या तेन। तरुलतादीनां वर्णवैविध्यम्। स्वेच्छया विहरतां पक्षिणां मधुरः कलरवः! निर्बाधं सञ्चरतां वन्यपशूनां रूपवैविध्यम्! एतादृशं प्रकृतिवैचित्र्यं सौन्दर्यं च दृष्ट्वा सन्तोषम् अनुभवतु इति आलोच्य भगवता मानवे अपूर्वं मस्तिष्कं निहितम्। प्राकृतिकस्य एतस्य ऐश्वर्यस्य मूल्यं जानाति मानवः। युक्तायुक्तविवेके समर्थः अपि सः। तथापि मानवः बहुत्र अविवेकेन एव व्यवहरति। प्रपञ्चस्थानां सर्वेषां स्वामी अहम् एव इति भावयति सः। परहितम् अपि चिन्तयन् मानवः यदि विवेकेन व्यवहृतवान् स्यात् तर्हि कियत् समीचीनम् अभविष्यत्!



परहितैकचिन्तकस्य नूतनस्य मानवस्य सृष्टिः कुतो वा मया न करणीया? अवश्यं करणीयं मया। मम तपःशक्तिम् उपयुज्य एतत् साधनीयम्।'

'स्वपरिसरे लोपं दृष्ट्वा अपि यः मौनं तिष्ठति सः पापभाक् भवति एव। अतः मया लोकस्य न्यूनतायाः निवारणार्थं प्रयत्नः अवश्यं करणीयः'

सुदीर्घस्य चिन्तनस्य अनन्तरं सत्यानन्दमुनिः एवं निर्णीतवान् आसीत्। सत्यानन्दमुनिना प्राकृतिकरहस्यानि बहुधा परिशीलितानि आसन्। योगशक्त्या विभिन्नाः प्रयोगाः अपि कृताः आसन्। नूतनस्य मानवस्य सृष्टौ स्वार्थभावना काऽपि न आसीत् खलु। अतः धैर्येण तथा कर्तुम् उद्युक्तः अस्ति सः। यदि एतेन भगवदिच्छायाः विरोधः स्यात् तर्हि अपि दयामयः भगवान् क्षाम्यति एव इति तस्य दृढः विश्वासः।

पर्वतशिखरात् सत्यानन्दमुनिः यदा गुहासमीपम् आगतः तदा शिष्यः उक्तवान्– "गुरुवर्य! मुहूर्तः आसन्नः अस्ति" इति।

"आम्। यज्ञः काले एव परिसमापनीयः। एषोऽहम् आगच्छामि" इति उक्तवान् सत्यानन्दमुनिः।

उभौ अपि मिलित्वा गुहां प्रविष्टवन्तौ। गुहायाः पार्श्वद्वये द्वारद्वयम् अस्ति। मध्ये होमकुण्डः आसीत्। अग्नेः प्रकाशः तत्र सर्वत्र प्रसृतः आसीत्।

सत्यानन्दमुनिः होमकुण्डस्य पार्श्वे उपविश्य– "वत्स कपिल! अग्निः निरन्तरं ज्वालासहितं यथा ज्वलेत् तथा पश्यतु। कस्मिंश्चित् अपि क्षणे अभीष्टसिद्धिः भवितुम् अर्हति" इति उक्त्वा नेत्रे निमील्य ध्यानमग्नः जातः।

क्षणकालस्य अनन्तरं नेत्रे किञ्चित् उन्मील्य मन्त्रान् जपन् विविधाः समिधः, पुष्पाणि, कुङ्कुमादीनि च आहुतिरूपेण अर्पयति स्म।

अग्निज्वालाः क्रमशः कञ्चित् निर्दिष्टम् आकारं प्राप्तवत्यः। एतत् दृष्टवतः मुनेः नेत्रे विकसिते। अनन्तरक्षणे कश्चन मानवाकारः





तत्र स्फुटः जातः। तस्य आकारस्य सर्वाणि अङ्गानि स्फुटानि जातानि। किन्तु स च आकारः मानवापेक्षया नितरां वामनः।

स च मनुष्याकारः मुनिं विनयेन नमस्कृत्य– "अहं कः?" इति पृष्टवान्।

"भवान् मनुष्यः। किन्तु भवान् न सामान्यः। यज्ञद्वारा पञ्च भूतानि मेलयित्वा भवन्तं सृष्टवान् अस्मि। अतः पञ्चानाम् अपि भूतानां शक्तिः अस्ति भवति। प्रपञ्चे प्रचलन्तः असत्यव्यवहार-वञ्चना-द्रोह-क्रौर्यादयः सर्वे ज्ञायन्ते भवता। किन्तु भवान् कदापि क्रौर्यादिषु आसक्तः न भविष्यति। इतरमानवानां व्यवहारात् भिन्नं भवति भवतः व्यवहारः। धर्मरक्षणार्थम् एव भवान् आजीवनं कार्यं करिष्यति। मानवजातेः मार्गदर्शकः भवति भवान्। बहोः कालस्य मम स्वप्नः भवद्द्वारा साकारः भविष्यति" इति उक्तवान् मुनिः सत्यानन्दः।

"भवतः अपेक्षां निश्चयेन पूरयिष्यामि। सर्वाः भाषाः ज्ञायन्ते मया। किन्तु अहम् अन्येषाम् अपेक्षया किमर्थं वामनः जातः?" इति पृष्टवान् सः नूतनः मानवः।

"भवान् न सामान्यः इति उक्तं खलु मया? असामान्या बुद्धिशक्तिः भवतः। युक्तौ शक्तौ च भवतः अपूर्वं सामर्थ्यम्। भवदीयानि सर्वाणि अङ्गानि अतीव समर्थानि। अतः अङ्गानि यावदावश्यकं तावदेव प्रवृद्धानि। मानवेषु अङ्गानि दीर्घाणि उन्नतानि वा। किन्तु न तानि तावत् समर्थानि। लोकस्य अभ्युदयार्थं कार्यं करणीयं भवता। शैघ्र्येण गमनार्थं भवतः एतत् वामनं शरीरम् आनुकूल्यं कल्पयति। भवतः नाम 'अपूर्वः' इति निर्दिशामि अहम्। नाम्ना अपूर्वः भवान् व्यवहारेण अपि अपूर्वः भविष्यति। यद्यपि भवान् इदानीं वामनः, तथापि एतत् वामनं रूपं आजीवनं भविष्यति इति न। जीवनस्य उत्तरार्धे भवता बहुधा पराक्रमाः प्रदर्श्यन्ते। क्रूरशक्तयः सम्मुखीक्रियन्ते। अन्ते किञ्चित्कालं शान्तं जीवनं यापयिष्यति भवान्। तदा भवदीयम् शरीरं सामान्यमानवाकारकं भविष्यति। किन्तु तच्च कदा इति तु दैवेन एव निर्णीयते" इति

उक्तवान् मुनिः सत्यानन्दः।

"आर्य! सर्वं ज्ञातम्। भवतः अपेक्षां निश्चयेन पूरयिष्यामि" इति विनयेन उक्तवान् अपूर्वः।

तावता तेन उदरे काचित् पीडा अनुभूता। एषा बुभुक्षापीडा इति स्वज्ञानबलात् ज्ञातवान् सः। बुभुक्षानिवारणार्थं फलादिकं किमपि लभ्येत वा इति परितः दृष्टवान् सः। सत्यानन्दमुनिः तस्य इङ्गितं जानन् शिष्यं कपिलं मन्दहासपूर्वकम् उक्तवान्– "वत्स! एतस्य खादनार्थं पूर्वं मया सज्जीकृत्य स्थापितानि फलानि आनयतु" इति।

अनन्तरं सत्यानन्दमुनेः आज्ञायाः अनुगुणं शिष्यः कपिलः कानिचन फलानि आनीय स्थापितवान्।

"अपूर्व! एतानि फलानि यः खादति तं बहूनि दिनानि यावत् बुभुक्षापिपासादयः न बाधन्ते" इति उक्तवान् मुनिः।

तानि स्वीकृत्य– "महात्मन्! धन्यवादाः। इदानीं बहिः गन्तुम् अनुज्ञा दातव्या" इति उक्तवान् अपूर्वः।

"इष्टार्थसिद्धिः भवतु। विशालं प्रपञ्चं प्रविशतु तावत्" इति उक्तवान् मुनिः।

अपूर्वः भक्त्या मुनिं नमस्कृत्य गुहातः बहिः आगत्य अग्रे गतवान्। मुनिः शिष्यश्च तम् अनुसृतवन्तौ।

सूर्यस्य बालकिरणानां स्पर्शतः रोमाञ्चं सन्तोषं च प्राप्नुवन् अपूर्वः– "अहो! महत् सुखम्! मधुरः अनुभवः!" इति उक्तवान्।

"वत्स! एतादृशी मधुरानुभूतिः भवतः






जीवने सदा भविष्यति। वस्तुतः तु एषः प्रपञ्चः मधुरानुभवदाता एव। किन्तु मानवाः स्वकृत्यैः अनिष्टं फलं प्राप्नुवन्ति कदाचित्। भवान् सदा कर्तव्यपरायणः भवतु। सत्कार्यं भवतः जीवनस्य लक्ष्यं भवतु। यशोमार्गे अग्रेसरः भवतु'' इति उक्तवान् मुनिः।

तावता अपूर्वस्य भ्रुवौ वक्रे जाते। ''किमिदं श्रूयते! कुतः एषः आर्तनादः? अहो तत्र अग्निज्वालाः! कथम् एवं प्रवृत्तम्! के ते सकरुणं क्रन्दनं कुर्वन्ति!'' इति खेदेन उक्तवान् अपूर्वः।

''किं श्रुतम्? अस्माभिः किमपि न श्रुतम्। किमपि न दृष्टम् अपि'' इति उक्तवान् शिष्यः कपिलः।

''आं वत्स! वयं यत् द्रष्टुं श्रोतुं वा न शक्नुमः तादृशम् अपि द्रष्टुं श्रोतुं च शक्नोति अपूर्वः। तस्य इन्द्रियाणां पाटवम् अपूर्वम्। तद्बलात् सः तादृशं शृणोति पश्यति च। तावदेव न, वायुवेगेन सञ्चारे अपि समर्थः सः। अग्रिमां घटनां पश्यतु तावत्'' इति कपिलम् उक्तवान् मुनिः।

''तत्र किं प्रवर्तते इति पश्यामि वा?'' इति सत्यानन्दमुनिं पृष्टवान् अपूर्वः।

''अवश्यं पश्यतु। देवः एव भवतः साहाय्यकः'' इति उक्तवान् मुनिः।

अपरक्षणे अपूर्वः वेगेन धावितवान्। धावन् सः पाञ्चालिकारूपम् इव प्राप्नुवन्, क्षीणः भवन् कुत्रापि अदृश्यः अभवत्।

एतत्सर्वं पश्यन् स्थितः कपिलः आश्चर्येण– ''कथम् एतत्? कुत्र गतः अपूर्वः? कथम् अदृश्यः अभवत् सः?'' इति पृष्टवान्।

''वेगाधिक्येन गमनेन एतत् सिद्ध्यति। भगवदनुग्रहः अत्र साहाय्यकः। पामराः वयम् एतादृशं द्रष्टुं न शक्नुमः'' इति उक्तवान् सत्यानन्दमुनिः।

* * * *

''अहो, औद्धत्यं भवताम्! भूस्वामिनः गृहस्य निर्माणार्थम् आगमनं निराकुर्वन्तः सन्ति भवन्तः। महान्तः कुपिताः भवन्ति चेत् कः परिणामः स्यात् इति सम्यक् ज्ञातव्य भवद्भिः। कृतस्य फलम् अनुभवन्तु'' इति कोपेन वदन्तः केचन दृढकायाः

कुटीरसदृशानि गृहाणि अग्निना ज्वालयन्तः आसन्।

"कियत्कालं निर्वेतनं कार्यं कर्तुं शक्येत? आयकराणि कार्याणि परित्यज्य वयं यथाशक्ति भूस्वामिनः गृहस्य निर्माणकार्ये सहकारं दत्तवन्तः। गृहे पत्नीपुत्रादयः सन्ति। ते उपवासकारणतः मरणं प्राप्नुवन्तः सन्ति। अतः इतः परम् अपि वयं निर्वेतनं कार्यं कर्तुं न शक्नुमः। अस्माकं कष्टम् अवगच्छन्तु कृपया। गृहाणि मा ज्वालयन्तु" इति वदन्तः आसन् केचन निर्धनाः। किन्तु तेषां कथनं, रोदनम्, आर्तनादं वा कः शृणोति?

दृप्ताः भूस्वामिनः सेवकाः अट्टहासं कुर्वन्तः गृहाणां ज्वालने मग्नाः आसन्। अवरोधकान् लीलया अपसारयन्तः ते अग्रे गच्छन्तः आसन्। जनानाम् आक्रन्दनं तेषाम् उत्साहं वर्धयति स्म।


अकस्मात् अग्निज्वालानाम् उपरि वृष्टिः इव जलबिन्दवः पतिताः। भूस्वामिनः सेवकाः आश्चर्यम् अनुभवन्तः आकाशं पश्यन्ति। आकाशे मेघाः न दृश्यन्ते। मेघानाम् अभावे वृष्टिः कथम् इति परितः दृष्टवन्तः ते।

तावता कश्चन विचित्रः ध्वनिः श्रुतः। ध्वनिम् अनुसरन्तः ते तस्यां दिशि दृष्टिं प्रसारितवन्तः। अनतिदूरे स्थितायां लघुनद्यां गजानां समूहः दृष्टः। गजाः शुण्डया जलम् उन्नीय अग्नेः उपरि पातयन्तः आसन्। एवं जलं पातयन्तः एव ते भूस्वामिसेवकान् कोपेन दृष्टवन्तः। घीङ्कुर्वन्तः तान् प्रहर्तुम् अग्रे आगतवन्तः अपि। एतत् दृष्ट्वा दिग्भ्रान्ताः ते सेवकाः ततः पलायनं कृतवन्तः।

एवं पलायनं कुर्वतः भूस्वामिनः सेवकान् दृष्ट्वा कश्चित् सन्तोषेण उच्चैः हसितवान्। उन्नतस्य गजस्य उपरि उपविश्य गजं चालयन् अग्रे आगच्छन् अस्ति सः।

'कः एषः आर्तरक्षकः विलक्षणः पुरुषः? एषः देवः, उत पिशाचः, उत वन्यजनः? अस्मान् एषः पीडयति चेत् किं करणीयम्?' इति चिन्तयन्तः जनाः किङ्कर्तव्यतामूढाः जाताः। —(अनुवर्तते)





# अपूर्वस्य साहसगाथा

## ३

(सत्यानन्दमुनिः स्वस्य तपसः बलेन यज्ञद्वारा अपूर्वशक्तिमन्तम् अपूर्वं सृष्टवान्। स च अपूर्वः जनोपकारकः। ग्रामज्वालने मग्नान् भूस्वामिसेवकान् दूरं सम्प्रेष्य निर्धनान् रक्षितवान् सः। बलिसमर्पणार्थं चोरैः नीतं समीरनामकं बालकं रक्षितवान्, तं तदीयं ग्रामं प्रापितवान् च। तदनन्तरम्.....)

सकुशलं प्रत्यागच्छन्तं समीरं दूरात् एव दृष्ट्वा महता सन्तोषेण ग्रामीणाः धावन्तः तस्य समीपम् आगतवन्तः।


बालकस्य कस्यचित् आगमनं, जनानां धावनं, तेषां मुखे सन्तोषं च दृष्ट्वा आश्चर्यम् अनुभवन् दलपतिः 'किम् एतत्?' इति स्वगतं वदन् गमनं स्थगितवान्।

समीरस्य माता– "वत्स! आगतः खलु भवान्! देवः दयालुः" इति वदन्ती पुत्रं दृढम् आलिङ्ग्य आनन्दाश्रूणि स्रावितवती।

ग्रामाधिकारी समीरस्य समीपम् आगत्य सन्तोषं प्रकटयन्– "धीरः भवान्। चोरैः गृहीतः अपि भवान् अल्पं क्षतम् अपि अप्राप्य सकुशलं प्रत्यागतः। श्लाघनीयः प्रयत्नः भवतः" इति उक्तवान्।

"आम्। धीरः समीरः" इति वदन्तः अन्ये ग्रामीणाः शिरः चालितवन्तः।

किन्तु समीरः विनयेन सर्वान् नमस्कृत्य



आकाशं पश्यन् नमस्कारं कृत्वा उक्तवान्– ''अद्य मृत्युमुखात् अहं प्रत्यागतः यत् तत्र नाहं कारणं, न मम धैर्य-साहस-बुद्धिमत्तादयः। सः भगवान् एव दिव्यं पुरुषं कञ्चित् सम्प्रेष्य तद्द्वारा मां रक्षितवान्। अद्य अहं कथमपि सजीवं प्रत्यागतः। किन्तु किं तेन? इतः पूर्वं तैः यथा बहवः नीताः, बलिरूपेण समर्पिताश्च तथैव इतः परम् अपि प्रचलिष्यति। अतः मम एकस्य सजीवं प्रत्यागमनं न सन्तोषस्य विषयः'' इति।

''स्यात् नाम तथा। तथापि चोराणां बन्धनात् विमोचनं प्राप्य भवान् प्रत्यागतः इत्येतत् न सामान्यः विषयः। किं करवाम! तान् दुष्टान् चोरान् निवारयितुम् अस्माकं सामर्थ्यं नास्ति। महाराजस्य शूराः सैनिकाः अपि एतद्विषये असमर्थाः इति चेत् का कथा अस्माकम्? सर्वं मौनं सोढव्यम्। न अन्या गतिः'' इति खेदेन उक्तवान् ग्रामाधिकारी।

तदा समीरः गम्भीरस्वरेण उक्तवान्– ''मद्द्वारा किमपि महत् कार्यं सम्भविष्यति इति तेन देवदूतेन उक्तम्। एतेषां दुष्टानाम् अन्त्यकालः सन्निहितः इति भावयन्तु। सर्वस्य अपि कश्चन अन्त्यकालः भवेत् एव खलु? महाराजस्य सैनिकाः सौभाग्यवशात् अत्रैव आगताः सन्ति। ते यदि मया सह आगच्छेयुः तर्हि चोराणां बन्धनार्थं मार्गं प्रदर्शयिष्यामि अहम्। एतत्कार्यम् अद्यैव स्यात्। विलम्बः कृतः चेत् कार्यं न सिध्येत्'' इति।

एतत् श्रुत्वा तत्रत्याः सर्वे आश्चर्यातिरेकेण समीरं पश्यन्ति। दलनायकः तु– 'एतस्य बुद्धिः भ्रष्टा स्यात् वा?' इति चिन्तयन् तीक्ष्णया दृष्ट्या समीरं पश्यति। किन्तु ग्रामाधिकारिणः तु समीरे प्रबलः विश्वासः। सः समीरस्य हस्तं स्वहस्तेन प्रीत्या गृहीत्वा– ''ते चोराः कुत्र भवन्ति इति भवान् सम्यक् जानाति वा? वयं सर्वे गच्छामः चेत् चोराः ततः पलायनं कुर्युः, आक्रमणं वा कुर्युः। एवं किल?'' इति उक्तवान्।

तदा दलपतिः ग्रामाधिकारिणम् उक्तवान्– ''चोराः तत्रैव भवन्ति इति

चिन्तयाम चेदपि केचन एव सैनिकाः तान् क्रूरान् ग्रहीतुं नार्हति। अन्यच्च अयं च बालः। एतस्य वचने विश्वस्य गमनेन सैनिकानां प्राणहानिः जाता चेत् राजा मां सम्यक् निन्देत्'' इति।


''अत्र न कोऽपि अपायः। चोराः सर्वे गुहायां मूर्च्छया पतिताः सन्ति। अद्य सायङ्कालात् पूर्वं ते जागरिताः न भवेयुः। अतः तेषां ग्रहणं सुलभम्। मां यः रक्षितवान् सः देवदूतः एव उपायेन तान् मूर्च्छितान् कृतवान्'' इति उक्तवान् समीरः।

'एवं वा?' इति आश्चर्येण उक्तवान् दलपतिः। तस्य मुखं विकसितं जातम्। सः सैनिकान् आज्ञापितवान् यत् गमनार्थं सिद्धाः भवन्तु, माम् अनुसरन्तु इति।

''वत्स! समीर! ह्यः आरभ्य भवता किमपि न खादितं स्यात्। बुभुक्षया श्रान्तः स्यात् भवान्। अतः किमपि किञ्चित् खादित्वा गच्छतु'' इति प्रीत्या उक्तवती समीरस्य माता।

''अम्ब! कार्यं समाप्य एव किमपि खादिष्यामि। अल्पः विलम्बः अपि कदाचित् कार्यनाशकः भवेत्। महाराजसैनिकाः अत्र उपस्थिताः सन्ति इति तु महते सौभाग्याय। अतः अविलम्बेन गमनं वरम्'' इति उक्त्वा ततः प्रस्थितवान् समीरः।

दलपतिः समीरम् अनुसृतवान्। सैनिकाः दलपतिम् अनुसृतवन्तः। दृढकायाः धीराः




केचन युवकाः अपि कुतूहलेन तान् अनुसृतवन्तः। ग्रामीणानां हस्ते लवित्र-दण्ड-धनुर्बाणादयः आसन्।

सर्वे उत्साहेन पर्वतसमीपं गतवन्तः। यदा चोराणां वसतिः आसन्ना तदा समीरः सर्वान् तत्रैव मौनं स्थातुम् उक्त्वा स्वयं पर्वतशिखराग्रं गत्वा खाते दृष्टिं प्रसारितवान्। गुहामुखसमीपे मूर्च्छायाम् एव स्थिताः चोराः दृष्टाः तेन।

समीरः मन्दहासं प्रकटयन् हस्तम् इतस्ततः चालयन् दलपतिं ग्रामाधिकारिणं च सूचितवान् यत् सर्वे उपरि आगच्छन्तु इति।

ग्रामाधिकारी दलपतिः अन्ये च उत्साहेन समीरसमीपम् आगतवन्तः। ततः ते सर्वे



गुहासमीपम् आगतवन्तः। दलपतेः आज्ञानुसारं सैनिकाः वृक्षेषु संलग्नाः दृढाः लताः कर्तयित्वा आनीय चोराणां हस्तान् बद्धवन्तः।

सर्वप्रथमं सचेतनः जातः भैरवमल्लः एव। यदा तेन नेत्रे उन्मीलिते तदा खड्गहस्तः दलपतिः पार्श्वे दृष्टः। अहं कुत्र कस्यां स्थितौ अस्मि इति भीत्या परिशीलयति भैरवमल्लः। तस्य मुखे क्रोधः दृश्यते।

"अये दुष्ट! समाप्ता भवतः कथा। इदानीम् अस्माकं बन्दी भवान्। अस्माकं बन्धनतः विमोचनं सर्वथा असाध्यम् इति स्मरतु। वयं यथा आदिशामः तथा आचरतु। अन्यथा शिलाकण्टकमये मार्गे भवन्तं निर्दयम् आकृष्य नयामः। महाराजस्य पुरतः भवतः शिरः स्थापयिष्यामः। प्राणाः यदि प्रियाः स्युः तर्हि विधेयतया व्यवहरतु" इति कोपेन गर्जितवान् दलपतिः।

भैरवमल्लः परितः दृष्ट्वा सर्वे अनुचराः अपि बद्धाः सन्ति इति ज्ञात्वा दन्तैः लतां छेत्तुं प्रयत्नं कृतवान्। तदा दलपतिः मुष्ट्या तस्य मुखे तीव्रं प्रहृत्य– "दुष्ट! पुनः प्रहृतं चेत् दन्ताः सर्वे उदरं प्रविशेयुः। व्यर्थः साहसप्रयत्नः मास्तु। वयं यथा आदिशामः तथा आचरतु" इति उक्तवान्।

तावता अन्ये चोरानुचराः अपि सचेतनाः जाताः। 'वयं सर्वे भटैः बद्धाः स्मः' इति ज्ञातवन्तः ते। भटानां हस्ते स्थितानां कशानां दर्शनात् तेषां प्रतिरोधोत्साहः सर्वथा शान्तः।

चोरैः सह ततः प्रस्थितवान् दलपतिः। एकैकस्य चोरस्य पार्श्वे उभौ सैनिकौ स्तः। समीरः ग्रामाधिकारी च अग्रे प्रस्थितवन्तौ।

ते सर्वे समीरस्य ग्रामम् आगतवन्तः। तावता एतां वार्तां श्रुत्वा समीपस्थेभ्यः ग्रामेभ्यः अपि आगताः जनाः तत्र सम्मिलिताः आसन्। चोराः शिरः अवनमय्य स्थिताः सन्ति। चोरैः पूर्वं याः पीडाः दत्ताः ताः स्मरन्तः केचन क्रोधेन चोरान् ताडयितुम् उद्युक्ताः। तदा तान् तस्मात् प्रयत्नात् निवारयन् समीरः उक्तवान्– "अलं ताडनेन। चोराः तु बद्धाः सन्ति। महाराजः एतान् योग्येन दण्डेन दण्डयिष्यति।

दण्डनाधिकारः महाराजस्य एव, न तु अस्माकम्। पूर्वम् एतेभ्यः याः पीडाः अनुभूताः ताः महाराजं विस्तरेण निवेदयन्तु। तावता अलम्। महाराजः एव यथायोग्यं करिष्यति'' इति।

ग्रामीणाः— 'समीरः जयतु' इति पुनः पुनः उच्चैः वदन्तः जयघोषं कृतवन्तः। समीरं स्कन्धे आरोप्य नृत्यं कृतवन्तः केचन।

परमसन्तुष्टः ग्रामाधिकारी उपस्थितेभ्यः सर्वेभ्यः भोजनकूटं व्यवस्थापितवान्।

भोजनानन्तरं सर्वे इतस्ततः सञ्चरन्तः आसन्। समीरः छायायुक्तस्य कस्यचित् वृक्षस्य अधः स्थितः आसीत्। तावता अनतिदूरे एव शीष्कारध्वनिः श्रुतः। समीरः परिवृत्य दृष्टवान्। गुल्मस्य कस्यचित् पृष्ठतः स्थितः अस्ति अपूर्वः।

'जनानां पुरतः आत्मानं प्रकटयितुम् अनिच्छन् अपूर्वः किमपि सूचयितुं मां स्वसमीपम् आह्वयन् अस्ति' इति जानन्, अपूर्वस्य दर्शनात् जातं सन्तोषं मुखे अप्रकटयन् सञ्चारार्थं गच्छन् इव गुल्मस्य समीपं गतवान् समीरः। ''श्रीमन्! भवतः दर्शनात् महान्तं सन्तोषम् अनुभवन् अस्मि'' इति मन्दस्वरेण अपूर्वम् उक्तवान् सः।

''समीर! भवतः दर्शनात् ममापि सन्तोषः एव। चोराणां ग्रहणे भवता यत् कौशलं प्रदर्शितं तत् श्लाघ्यम्। एते चोराः दुष्टाः स्युः चेदपि मानवाः एव किल? अतः एतेभ्यः अपि




आहारः दातव्यः इति ग्रामाधिकारिणं सूचयतु। एतत् स्मारयितुम् एव अहम् अत्र आगतः'' इति उक्तवान् अपूर्वः।

''यथा भवतः आदेशः तथा करिष्यामि भगवन्!'' इति विनयेन उक्तवान् समीरः।

''भगवन् इति मास्तु, मित्र इति सम्बोधयतु। तावता अलम्'' इति हसन् उक्त्वा अपूर्वः ततः निर्गतवान्।

* * * *

दलनायकः चोरान् सर्वान् राजधानीं नीत्वा राज्ञः पुरतः उपस्थापितवान्। ग्रामीणाः बहवः आगत्य चोरैः दत्ताः पीडाः विस्तरेण निवेदितवन्तः। राजा तेषां शूलारोपणं विहितवान्। चोराः सर्वे कारागारे स्थापिताः। तेभ्यः अल्पः आहारः दीयते स्म प्रतिदिनम्।



'अस्माकम् एतादृश्याः दुर्गतेः कारणं भैरवमल्लः एव' इति अनुचराणां चोराणाम् आशयः। अतः ते भैरवमल्लं क्रोधातिशयेन पश्यन्ति।

"अये भैरव! भवत्कारणतः अस्माकम् एतादृशी गतिः" इति क्रोधेन भैरवमल्लम् उद्दिश्य उक्तवान् कश्चन चोरः।

"अये! मां नाम्ना सम्बोध्य निन्दति वा भवान्? एतावत् औद्धत्यं वा भवतः? अहम् अस्मि भवतां नायकः भैरवमल्लः। एतावत्पर्यन्तं प्रभो इति सम्बोधयन् भवान् अद्य मां नाम्ना आह्वयन् अस्ति वा? जिह्वां विदारयेयम्। जागरूकः भवतु" इति उक्तवान् भैरवमल्लः।

"वृथा आटोपः भवतः। अस्माकं सर्वेषां मरणस्य कारणं भवान् एव। भवान् आदरेण दृष्टः यत् तस्य फलम् एतत्" इति विषादयुक्तेन स्वरेण उक्तवान् अन्यः चोरः।

"रे उद्धत! मुखं पिदधातु रे! अन्यथा यमसदनं प्रेषयिष्यामि" इति क्रोधेन उक्तवान् भैरवमल्लः।

"तत्कार्यं राजभटाः करिष्यन्ति। भवतः अपि एषा एव गतिः। मरणं विना नान्यत् शरणम्" इति खेदेन उक्तवान् सः अनुयायिचोरः।

एतादृशं विरोधं सोढुम् अशक्नुवन् भैरवमल्लः फूत्करोति। किन्तु दन्तरहितः सर्पः सः। तस्य कोपः आदेशः वा अकिञ्चित्करः इदानीम्।

"भवन्तः शूलारोपणात् आत्मानं रक्षितुम् इच्छन्ति वा?" इति कश्चन प्रश्नः कस्माच्चित् कोणात् आगतः।

आश्चर्यचकिताः सर्वे चोराः अन्धकारमयं तं कोणं पश्यन्ति। "कः सः तत्र?" इति पृष्टवान् भैरवमल्लः।

"यः भवतां बन्धनस्य कारणं स एव अहम्" इति उत्तरम् आगतम्।

"अस्माकं बन्धनं कारितवान् भवान् इदानीं किमर्थं विमोचनप्रस्तावं करोति?" इति पृष्टवान् भैरवमल्लः।

"भवद्भिः चौर्यलुण्ठनादिकं निन्द्यं कार्यं क्रियमाणम् आसीत्। अतः बन्धनं कारितवान्। किन्तु अपराधस्य मरणम् एव


परिहारः इति न भावयामि अहम्। कृतस्य कृत्यस्य निमित्तं पश्चात्तापः अनुभूयते चेत्, सन्मार्गे गमनार्थं दृढसङ्कल्पः क्रियते चेत् क्षमां दापयितुं शक्येत। सन्मार्गेण गमनं भवद्भ्यः रोचते चेत् वदन्तु। तदा भवतः सर्वान् राजा यथा क्षाम्येत् तथा करिष्यामि" इति वचनं तस्मात् कोणात् आगतम्। एवं कथयिता अपूर्वः एव, नान्यः।

क्षणकालस्य मौनस्य अनन्तरं चोराः एकस्वरेण उक्तवन्तः– "महात्मन्! क्षमया यदि वयम् अनुगृहीताः स्याम तर्हि सन्मार्गेण गमिष्यामः इति प्रतिज्ञां करिष्यामः। भवतः वचनं पालयिष्यामः" इति।

"भैरवमल्ल! एतद्विषये भवतः आशयः कः?" इति पृष्टवान् अपूर्वः।

"मया अपि पूर्वं कदाचित् सन्मार्गेण गमनं निश्चितम् आसीत्। किन्तु दारिद्र्यात् धनलोभाच्च चौर्यमार्गः आश्रितः। 'विवेकभ्रष्टानां भवति विनिपातः शतमुखः' इति वचनं सत्यम् एव। अहं पापगर्ते पतितः। पापाचरणम् एव मम वृत्तिः जाता। धनलोभेन वञ्चनया च अन्यान् अपि अहं पापगर्ते पातितवान्। एतादृशं मां को वा क्षाम्यति?" इति विषादयुक्तेन स्वरेण उक्तवान् भैरवमल्लः।

"कः क्षाम्यति इति चिन्ता मास्तु भवतः। कृतस्य अकार्यस्य विषये पश्चात्तापः तु अनुभूयते खलु? धर्ममार्गानुसरणं क्षेमाय इति



भासते खलु?" इति उक्तवान् अपूर्वः।

"अनुचरैः अपि धिक्क्रियमाणस्य मम हृदयं पश्चात्तापेन नितरां दग्धम् अस्ति। किन्तु किं तेन? मत्कारणतः एते अनुचराः पापगर्ते पतिताः। अतः राजा यदि एतान् क्षमया अनुगृह्णीयात् तर्हि अहं धन्यः भवेयम्" इति उक्तवान् भैरवमल्लः।

"मित्राणि! अलं चिन्तया। भैरवमल्ल! अलं विषादेन। भवन्तः पश्चात्तापम् अनुभवन्तः सन्ति इत्यत्र दृढः विश्वासः मम। भवन्तः भगवन्नाम जपन्तः सच्चिन्तनं कुर्वन्तु। शरणागतरक्षकः भगवान् भवतः सर्वान् रक्षिष्यति" इति उक्त्वा ततः निर्गतवान् अपूर्वः।

* * * *

"चोराः सर्वे पश्चात्तापेन दग्धाः सन्ति। अतः ते भवता क्षन्तव्याः इति मां रक्षितवान् देवदूतः मद्द्वारा वार्तां प्रेषितवान् अस्ति। अतः चोराः क्षन्तव्याः भवता" इति राजानं प्रार्थितवान् समीरः।

किन्तु राजा एतं प्रस्तावं निराकुर्वन् उक्तवान्– "कथं चोराः क्षन्तुं शक्याः? असङ्ख्याकाः जनाः पीडिताः तैः। बहवः निरपराधिनः मारिताः च। एतादृशानां कृते शूलारोपणम् एव उचितः दण्डः" इति।

"प्रभो! पश्चात्तापेन दग्धान् परमात्मा अपि क्षाम्यति" इति उक्तवान् समीरः।

"अये उद्धतबाल! परमात्मनः प्रतिनिधिः इव माम् उपदिशन् अस्ति किल? एतद्विषये बालकस्य भवतः उपदेशः न आवश्यकः" इति उक्तवान् राजा।

"अहं भगवतः प्रतिनिधिः न। यः मां रक्षितवान् सः देवदूतसदृशः दिव्यः पुरुषः मद्द्वारा एवं वार्तां प्रेषितवान् अस्ति" इति विनयेन उक्तवान् समीरः।

"सः दिव्यः पुरुषः यदि एतान् रक्षितुम् इच्छेत् तर्हि स्वसामर्थ्यबलेन अपूर्वं कृत्यं कृत्वा एतान् रक्षितुम् अर्हति खलु? भवद्द्वारा वार्तायाः प्रेषणस्य आवश्यकता का?" इति पृष्टवान् राजा।


"क्रूराः चोराः पश्चात्तापम् अनुभवन्तः सन्ति यत् तदेव तस्य दिव्यपुरुषस्य महत् कृत्यम्" इति उक्तवान् समीरः।

"एतेषां रक्षणं यदि भगवतः प्रियं स्यात् तर्हि भगवान् एव उद्बन्धकरज्जुच्छेदन-पूर्वकम्, अन्येन प्रकारेण वा एतान् रक्षिष्यति एव। यदि प्रियं न स्यात् तर्हि कथमपि प्राणान् हरिष्यति सः। अतः यत् उचितं तत् भगवान् एव करोतु" इति उक्तवान् राजा।

समीरः खेदेन ततः प्रतिनिवृत्य अपूर्वं दृष्ट्वा प्रवृत्तं समग्रं निवेदितवान्।

"भगवता क्रियमाणं द्रष्टव्यम् इति यत् राजा इच्छति तत् सम्भविष्यति एव। चिन्ता मास्तु भवतः" इति समीरम् उक्तवान् अपूर्वः। —(अनुवर्तते)





# अपूर्वस्य साहसगाथा

## ५

(दिव्यानन्दमुनिना सृष्टः 'अपूर्वः' नाम अपूर्वमानवः गजानां साहाय्येन, अग्निना दह्यमानानि दरिद्राणां गृहाणि रक्षितवान्। समीरनामकं बालकं चोरेभ्यः रक्षित्वा तद्द्वारा तान् चोरान् राजाधीनान् कारितवान्। चोराः यदा पश्चात्तापेन दग्धाः अभवन् तदा अपूर्वैः कृत्यैः तान् रक्षित्वा सन्मार्गगामिनः कृतवान्। मरणदण्डनात् विमुक्तिं प्राप्य चोराः सत्प्रजाः जाताः। तदनन्तरम्.....)

अपूर्वः स्वस्य सृष्टेः कारणीभूतस्य दिव्यानन्दमुनेः आश्रमं गत्वा मुनिं श्रद्धया नमस्कृत्य एतावत्पर्यन्तं यत् प्रवृत्तं तत् विस्तरेण निवेदितवान्।

"वत्स! मम आशयस्य अनुगुणम् एव व्यवहरन् भवान् मम मनोरथं सफलीकृतवान्। एतेन अहं नितरां सन्तुष्टः अस्मि। भवतः जीवनम् इतः परम् अपि एतादृशम् एव भवतु। परोपकारः जीवनस्य लक्ष्यं भवतु।" इति प्रीत्या उक्त्वा आशीर्वादेन अनुगृहीतवान् दिव्यानन्दमुनिः।

"श्रीमन्! जातमात्रेण मया कष्टमय्यः परिस्थितयः एव दृष्टाः। कष्टानां निवारणे एव मम समयः यापितः अभवत्। भगवता सृष्टस्य एतस्य प्रपञ्चस्य सौन्दर्यम् आतृप्ति परिशीलनीयम् इत्येषा मम इच्छा अपूर्णा एव तिष्ठति खलु?" इति गुरुं दिव्यानन्दमुनिं निवेदितवान् अपूर्वः।



''भवतः स्वरूपम् एव तादृशम्। भवान् यत्र कुत्रापि वा गच्छतु, तत्रत्या परिस्थितिः भवन्तं कार्ये प्रेरयेत् एव। प्रपञ्चः आनन्दनिलयः अस्ति चेदपि मानवाः स्वकीयाभिः स्वार्थभावनाभिः दुराशाभिः च तं शोकमयं कुर्वन्ति। सन्तोषेण स्थातव्यं चेत् मनः सदा परिशुद्धं स्यात्। यावत् मानवानां चञ्चलं मनः परिष्कृतं न भवेत् तावत् तैः अनुभवादिभिः विवेकं प्राप्य अग्रे गन्तव्यं भवति। ये अज्ञानादिकारणतः दुर्मार्गम् आश्रितवन्तः ते अस्माभिः प्रयत्नेन सन्मार्गे प्रेरणीयाः। एतत् अस्माकम् आद्यं कर्तव्यम्। एतत् मया ज्ञापनीयं नास्ति। यतः एषः गुणः भवति प्रकृतिगुणरूपेण स्थितः अस्ति। अतः कर्तव्यं श्रद्धया पालयता भवता, तन्मध्ये प्राप्ते अवकाशे अन्यत् इष्टम् अपि पूरणीयम्। जीवने कदापि कर्तव्यविमुखता न स्यात्'' इति बोधितवान् दिव्यानन्दमुनिः।

अपूर्वः गुरुं नमस्कृत्य कुटीरात् बहिः आगत्य क्रमशः वेगं वर्धयन् अदृश्यतां गतवान्।

* * * *

सायङ्कालसमये दीपपङ्क्त्या शोभमानः कश्चन प्रदेशः दृष्टः अपूर्वेण। सः वेगं न्यूनीकृत्य अधः आगतवान्। तेन इदानीं रत्नपुर्याः राजधानी प्राप्ता अस्ति। विशाले मुख्यमार्गे प्रजाः सम्मिलिताः दृष्टाः तेन।

अपूर्वः मन्दम् अग्रे गत्वा जनसम्मर्दे लीनः जातः। तस्य आगमनम् उपस्थितिं वा कोऽपि न ज्ञातवान्।

द्वौ राजभटौ सडिण्डिमघोषं वार्तां प्रसारयतः स्म– ''भो भोः जनाः, रत्नपुरीवासिनः! शृण्वन्तु सर्वे। राजकुमारी एषु दिनेषु अस्वस्था इति भवन्तः सर्वे जानन्ति एव। राजवैद्यानां चिकित्सा अपि सर्वथा विफला। अतः राजा उद्घोषयति यत् यः राजकुमार्याः रोगम् अपनेष्यति तस्मै तस्य यावान् भारः तावत् सुवर्णं दीयते इति। शृण्वन्तु भोः शृण्वन्तु'' इति।

जनाः एतत् आसक्त्या शृण्वन्ति। किन्तु राजकुमार्याः रोगस्य अपनयनम् अस्माभिः न शक्यते इति स्वगतं वदन्तः ते मौनं ततः

निर्गच्छन्ति। एवं जनाः सर्वे निर्गताः। अन्यत्र उद्घोषणार्थं राजभटौ अपि ततः निर्गतौ। सर्वेषु गतेषु अपि द्वौ तत्रैव स्थितवन्तौ। अपूर्वः कुतूहलेन तयोः सम्भाषणं रहसि तिष्ठन् श्रुतवान्।


"एतादृशम् उद्घोषणम् एव बहोः कालतः अहं प्रतीक्षमाणः आसम्" इति उक्तवान् तयोः अन्यतरः। एवं वक्ता उन्नतकायः आसीत्। दीर्घं श्मश्रु तस्य। कृष्णवस्त्रेण उष्णीषं रचितवान् आसीत् सः। तस्य नेत्रे सर्पस्य नेत्रे इव प्रकाशेते।

"श्रीमन्! राजकुमार्याः चिकित्सार्थं गमनसमये पूर्णोदरं भोजनं कृत्वा गन्तव्यम्। तदा तु शरीरस्य भारः वर्धिष्यते। तावता एव प्रमाणेन सुवर्णम् अधिकं प्राप्यते। यदि भारयुक्तानि वस्त्राणि धृतानि स्युः तर्हि अपि लाभः अधिकः। एवं ननु?" इति हसन् उक्तवान् अपरः। एतस्य मुखे दीर्घं श्मश्रु विराजते।

"शिष्योत्तम! भवतः योजना अपूर्वा एव। किन्तु वत्स! एषः भवतः गुरुः सर्पकेतुः अहं भवतः अपेक्षया अपि बुद्धिमान् अस्मि। मया यत् तन्त्रम् आश्रितं तत् सुवर्णस्य प्राप्त्यै केवलं न" इति साभिमानम् उक्तवान् दीर्घकायः।

"तर्हि भवतः उद्देशः कः?" इति कुतूहलेन पृष्टवान् शिष्योत्तमः।

"एषः भवतः गुरुः अचिरात् एव एतस्य



राज्यस्य उत्तराधिकारी भविष्यति। ज्ञातं वा?" इति हसन् उक्तवान् सर्पकेतुः।

"तत् कथं वा शक्यते? राजा भवतः शिष्यत्वम् अङ्गीकृत्य राज्यं भवतः पदतले अर्पयिष्यति वा?" इति कुतूहलेन पृष्टवान् शिष्योत्तमः।

"रे मूर्ख! उपायः सर्वसाधकः। राजा राज्यं सदक्षिणं मम हस्ते यथा निक्षिपेत् तथा योजनां कृतवान् अस्मि" इति हसन् उक्तवान् सर्पकेतुः।

"तच्च कदा सम्भाव्यते? कथं सम्भाव्यते?" इति पुनः पृष्टवान् शिष्योत्तमः।

"रे मूर्ख! राज्ञः एकमात्रपुत्री एषा



राजकुमारी इति जानाति खलु भवान्?" इति पृष्टवान् सर्पकेतुः।

"आम्। तत् तु जानामि" इति उत्तरं दत्तवान् शिष्योत्तमः।

"यदि राजकुमारी मह्यं दीयेत तर्हि एव तस्याः रोगः अपनीयते मया इति वदिष्यामि। राजा मम वचनम् अङ्गीकरिष्यति। जामाता अहम् एव खलु राज्यस्य उत्तराधिकारी भविष्यामि। दक्षिणारूपेण राजकुमारी अपि प्राप्यते मया" इति विवरणं दत्तवान् सर्पकेतुः।

"एवं वा! अपूर्वः उपायः भवतः। एतदर्थम् एव खलु– राजकुमारी अज्ञातेन रोगेण ग्रस्ता यथा स्यात् तथा कृतवान् भवान्?" इति पृष्टवान् शिष्योत्तमः।

"आम्। किन्तु केचन व्यवहाराः वचनैः न प्रकटनीयाः। कः जानाति – कदा दैवम् अस्मद्विरुद्धं भवति इति? तदस्तु, मम योजनायाः कार्यान्वयने भवतः साहाय्यम् आवश्यकम्। अहं स्वयं गत्वा यदि राजकुमारी मह्यं दातव्या इति वदेयं तर्हि मम गौरवस्य हानिः भवेत्। अतः भवता अद्य गत्वा वक्तव्यं यत् ,कष्टनिवारकः कश्चन दिव्यः वटवृक्षः अरण्ये अस्ति इति। श्वः सायङ्कालसमये राजा तत्र यथा आगच्छेत् तथा करणीयं भवता। स च वटवृक्षः कुत्र इति जानाति खलु भवान्?" इति पृष्टवान् सर्पकेतुः।

"आं स्मरामि। अरण्ये नदीतीरे प्राचीनदेवालय-वल्मीकयोः मध्ये स च वटवृक्षः अस्ति। तस्य वृक्षस्य कोटरे तिष्ठन् भवान् कञ्चित् वणिजं भायितवान् आसीत्। तदा स च वणिक् धनग्रन्थिं तत्रैव परित्यज्य भीत्या पलायनं कृतवान् आसीत्" इति उक्तवान् शिष्योत्तमः।


"आं, स एव वटवृक्षः। वटवृक्षं प्रति गमनार्थं मार्गं सम्यक् निर्दिशतु भवान् राज्ञः पुरतः। राजा वटवृक्षसमीपं यावत् न आगच्छेत् ततः पूर्वम् एव भवान् आगत्य कोटरे उपविशतु। नगरे किमपि खादन् वृथा समयं मा यापयतु। यदा महाराजः वृक्षसमीपम् आगत्य नमस्कृत्य विनयेन

तिष्ठति तदा भवता गम्भीरस्वरेण, मया सूच्यमानानि वचनानि वक्तव्यानि'' इति उक्तवान् सर्पकेतुः।

''अस्तु श्रीमन्, भवतः आदेशं शिरसा वहामि'' इति विनयेन गुरुं सर्पकेतुम् उक्तवान् शिष्योत्तमः।

''भवता राजा वक्तव्यः– 'इतः अनतिदूरे प्राचीने देवालये कश्चन संन्यासी निवसति। यदि तस्मै राजकुमारी दीयते तर्हि तस्याः व्याधिः समूलम् अपगच्छेत्। सः संन्यासी केवलं, राजकुमार्याः व्याधेः निवारणे समर्थः, नान्यः। यदि संन्यासिने राजकुमारी न दीयेत तर्हि सा अचिरात् एव मरणं प्राप्नुयात्। तदा राज्यं उत्तराधिकारिविहीनं भवेत्' इति। एतत् श्रुत्वा राजा प्राचीने देवालये उपविष्टवतः मम समीपम् आगमिष्यति। माम् आदरेण राजधानीं नेष्यति। अहं च राज्ञा सह राजधानीं गत्वा राजकुमारीं परिणीय तस्याः व्याधिं निवारयिष्यामि'' इति उक्तवान् सर्पकेतुः।

''गुरुवर्य! प्रतिदिनं प्रातः तुलसीरसः, सायं बिल्वपत्ररसः च सेवितः चेत् अल्पेन एव कालेन रोगः अपगमिष्यति इति खलु भवता उक्तम्? राजवैद्याः तु रोगलक्षणम् एव ज्ञातुम् अशक्नुवन्तः चिकित्सायाम् असफलाः जाताः। भवता यदि राजकुमार्याः व्याधिः प्रथमं निवार्येत तर्हि राजा कृतज्ञताभावेन भवते स्वपुत्रीं दद्यात् एव। विवाहः सर्वेषां



सम्मुखे सवैभवं प्रचलेत्। वरस्य भवतः आत्मीयं मां सर्वे आदरेण पश्येयुः'' इति सूचितवान् शिष्योत्तमः।

''रे मूर्ख! भवतः लोकानुभवः न्यूनः। राजकुमारी सर्वप्रथमं परिणेतव्या। विवाहात् पूर्वं दिनानि यापितानि चेत् कदाचित् हानिः सम्भवेत्। अपायः कदा कुतः आगच्छेत् इति कोऽपि न जानाति। अतः लक्षितस्य कार्यस्य अविलम्बेन साधनं बुद्धिमतः प्रथमं लक्षणम्। जनानाम् आदरः प्राप्तव्यः इति खलु भवतः इच्छा? यदा अहं राजा भविष्यामि तदा भवन्तम् आन्तरङ्गिकं करिष्यामि। तदा भवन्तं जनाः महता आदरेण पश्येयुः एव'' इति उक्तवान् सर्पकेतुः।




"अस्तु श्रीमन्" इति अङ्गीकारपूर्वकं शिरः चालितवान् शिष्योत्तमः।

"हुँ, गच्छतु राजभवनम्। मया यथा उक्तं तथा आचरन् कार्यं साधयतु" इति उक्त्वा शिष्योत्तमं सम्प्रेष्य स्वयं च अरण्यं प्रति प्रस्थितवान् सर्पकेतुः।

समग्रं सम्भाषणं श्रुतवता अपूर्वेण ज्ञातं यत् राजकुमार्याः व्याधिः एतेन दुष्टेन सर्पकेतुना मन्त्रादिप्रयोगतः कल्पितः। विनायासं तं व्याधिं निवारयन् एषः राजकुमारीं परिणेतुं सङ्कल्पितवान् अस्ति इति।

अपूर्वः सर्पकेतुम् अनुसृतवान्। सर्पकेतुः अनतिदूरस्थे अरण्ये स्थितं प्राचीनालयं प्राप्य मृगचर्म प्रसार्य तदुपरि उपविष्टवान्। मानवकपालादिकम् अन्यानि वर्णमयानि वस्तूनि च आत्मानं परितः स्थापितवान्।

रात्रेः प्रथमे यामे शिष्योत्तमः आगत्य सर्पकेतुं निवेदितवान्– "श्रीमन्! भवता यथा सूचितं तथैव कृतवान्। राजा मध्यरात्रसमये एकाकी एतस्य वृक्षस्य समीपम् आगमिष्यति" इति।

"साधु, वत्स! साधु! इतः परं भवान् वृक्षकोटरे एव उपविशतु। मया उक्तानि वचनानि मनसि एव पुनः पुनः स्मरतु। राजा यदा उपस्थितः भविष्यति तदा भवता तानि वचनानि न्यूनाधिक्यं विना वक्तव्यानि" इति सूचितवान् सर्पकेतुः।

शिष्योत्तमः अङ्गीकारपूर्वकं शिरः चालितवान्। ततः प्रस्थाय वृक्षस्य कोटरे उपविष्टवान् च।

अन्धकारमयी रात्रिः। राजा शिष्योत्तमस्य वचनेषु विश्वसन् अङ्गरक्षकान् दूरे एव स्थगयित्वा एकाकी वटवृक्षस्य समीपं गतवान्। अपूर्वः अपि इतः पूर्वम् एव विना शब्दं वृक्षम् आरुह्य निलीय उपवष्टिवान् आसीत्।

वृक्षसमीपम् आगतः राजा अश्वात् अवतीर्य जानुभ्यां वृक्षस्य पुरतः उपविश्य करौ योजयित्वा भक्त्या वटवृक्षं प्रार्थितवान्– "वृक्षोत्तम! वटश्रेष्ठ! मम पुत्र्याः व्याधेः निवारणोपायं सूचयन् भवान् माम् अनुगृहणातु" इति।

"राजन्! भवतः भक्त्या अहं सन्तुष्टः अस्मि" इति वृक्षकोटरस्थः शिष्योत्तमः गम्भीरस्वरेण उक्तवान्।

"धन्योऽस्मि। महात्मन्! व्याधि-निवारणार्थम् उपायम् अपि सूचयतु कृपया" इति प्रार्थितवान् राजा।

"इतः अनतिदूरे कश्चन प्राचीनदेवालयः अस्ति। तत्र कश्चन संन्यासिवेषधारी मान्त्रिकः उपविष्टः दृश्यते। सः एव मन्त्रप्रयोगेण राजकुमार्यां व्याधिं योजितवान्। अतः विना शब्दं तस्य समीपं गत्वा एकेन एव प्रहारेण स च दुष्टः मारणीयः भवता। एवं कृतं चेत् कार्यस्य अर्धभागः साधितः इव" इति सूचितवान् कोटरस्थः शिष्योत्तमः।

शिष्योत्तमस्य वचनं श्रुतवतः अपूर्वस्य महत् आश्चर्यम्! 'वञ्चनया राजकुमारीं प्राप्तुम् इच्छन्तं सर्पकेतुं वञ्चनया एव मारयितुम् उद्युक्तः एषः वञ्चकगुरोः योग्यः शिष्यः। वञ्चनामार्गस्य चिन्तने उभौ अपि असदृशौ' इति चिन्तितवान् अपूर्वः।

राजा वृक्षं त्रिवारं प्रदक्षिणीकृत्य नमस्कृत्य– "अये दिव्यवृक्ष! भवतः वचनं पालयिष्यामि। अग्रे मया किं करणीयम् इति सूचयतु। व्याधिनिवारणोपायम् अपि सूचयतु कृपया" इति प्रार्थितवान्।

"मया उच्यमानं श्रद्धया श्रुत्वा तदनुगुणं व्यवहरति चेत् इष्टं सेत्स्यति एव। श्वः प्रातः



सूर्योदयसमये पूर्वद्वारसमीपे कश्चन युवकः दृश्यते। सः वामनः स्थूलः श्मश्रुधारी च। तम् अन्तः नीत्वा आदरेण सत्करोतु। सः राजकुमार्याः व्याधिं निवारयिष्यति। व्याधिनिवारणसमर्थाय तस्मै एव राजकुमारी दातव्या अपि। सर्वप्रथमं स च दुष्टः मान्त्रिकः निर्दयं मारणीयः भवता" इति सूचितवान् कोटरस्थः शिष्योत्तमः।

"पुत्र्याः हितार्थम् अहं भवता यथा सूचितं तथा अवश्यं करिष्यामि" इति वदन् राजा पुनरपि वृक्षं भक्त्या नमस्कृतवान्।

"महाराज! तिष्ठतु तावत्। दुष्टस्य वचने मा विश्वसितु भवान्" इति वदन् अधः उत्प्लुतवान् अपूर्वः।

राजा दिग्भ्रान्तः सन् अपूर्वं दृष्टवान्। तावता अपूर्वः समीपस्थं शिलाद्वयम् उन्नीय शिलयोः घर्षणेन स्फुलिङ्गान् उत्पाद्य तृणेषु अग्निं योजितवान्। ज्वलन्ति तृणानि राशीकृत्य कोटरे पातितवान् च।

तदा शिष्योत्तमः– "हा हन्त! मृतोऽहम्। रक्षन्तु माम्" इति उच्चैः आक्रन्दनं कुर्वन् कोटरात् अधः उत्प्लुतवान्।

"गृह्णातु एतम्। राजकुमारीं परिणेतुम् इच्छन् वञ्चकः एषः एव" इति उच्चस्वरेण उक्तवान् अपूर्वः।

भीतः शिष्योत्तमः राज्ञः पादयोः पतितवान्। तावता आक्रन्दनं श्रुत्वा तत्र आगताः राज्ञः अङ्गरक्षकाः तं गृहीत्वा बद्धवन्तः।

"तस्मिन् प्राचीने आलये एतस्य गुरुः वञ्चकः मान्त्रिकः अस्ति। तम् अपि बध्नन्तु। यावत् एतौ आत्मनः अपराधं न अङ्गीकुरुतः तावत् एतौ कारागारे स्थापनीयौ, कठोरं दण्डनीयौ च" इति आज्ञास्वरेण उक्तवान् अपूर्वः।

"एतस्य गुरुः बध्यते, एतौ दण्ड्येते च। किन्तु मम पुत्र्याः व्याधेः निवारणं कथम्?" इति चिन्तायुक्तेन स्वरेण अपूर्वं पृष्टवान् राजा।

"प्रातः तुलसीरसः सायं बिल्वरसः च प्रतिदिनं सेवनीयः राजकुमार्या। एतेन अचिरात् एव सा व्याधितः मुक्ता भविष्यति। शुभं भवतु। पुनः मेलिष्यामि" इति उक्त्वा ततः वेगेन गच्छन् अपूर्वः क्षणाभ्यन्तरे अदृश्यतां गतवान्।

राजा भटैः सह प्राचीनं देवालयं प्राप्तवान्। राज्ञः मुखे क्रोधं दृष्ट्वा एव सर्पकेतुः ज्ञातवान् यत् कापि विपत् उपस्थिता इति। यावत् सः पलायनं कर्तुम् उद्युक्तः तावता राजभटाः वेगेन अग्रे आगत्य तस्य बन्धनं कृतवन्तः। सर्पकेतुः लज्जया शिरः अवनमय्य मौनं स्थितवान्। भटाः तं देवालयस्य पुरतः आकृष्य आनीतवन्तः।

–(अनुवर्तते)





# अपूर्वस्य साहसगाथा

## ६

(सत्यानन्दमुनिना तपोबलेन सृष्टः असदृशसामर्थ्यशाली अपूर्वः मुनेः आशयानुगुणं सज्जनान्, निर्धनान्, पामरान् च अपायात् रक्षति स्म। राजकुमारी अज्ञातेन व्याधिना ग्रस्ता यथा स्यात् तथा कृत्वा, व्याधिनिवारणव्याजेन तां परिणेतुम् इच्छन्तं दुष्टं मान्त्रिकं, वञ्चकं तच्छिष्यं च उपायेन राजाधीनौ कृतवान् अपूर्वः। तदनन्तरम्.....)

अपूर्वः दुष्टं मान्त्रिकं वञ्चकं तच्छिष्यं च राजाधीनौ कृत्वा समीरस्य समीपं गतवान्। गाढनिद्रायां मग्नस्य तस्य कर्णयोः समीपे स्थित्वा "समीर! समीर!" इति द्विवारम् आहूतवान्।


झटिति जागरणं प्राप्य समीरः अपूर्वं दृष्ट्वा आश्चर्यातिरेकेण मञ्चात् अवतीर्य भक्त्या अपूर्वं नमस्कृतवान्।

"समीर! भवता अल्पं साहाय्यं करणीयं खलु?" इति उक्तवान् अपूर्वः।

"किं तत् साहाय्यम्? भवान् मम देवः, मम प्रभुः। भवदर्थं यत्किमपि कर्तुं सिद्धः अहम्" इति उक्तवान् समीरः।

"पञ्च बालकाः अपायग्रस्ताः सन्ति। ते इदानीं त्वरया रक्षणीयाः" इति उक्तवान् अपूर्वः।

"भवता यथा सूच्यते तथा कर्तुम् अहं सिद्धः एव। मया किं करणीयम् इति आदिशतु" इति



वदन् समीरः अपूर्वेण सह गन्तुं सिद्धः जातः।

"का समस्या इति वक्तव्यं चेत् समयः आवश्यकः। इदानीं तु एकैकः क्षणः अपि अमूल्यः। भवान् मया सह आगच्छतु। भवान् एव सर्वं ज्ञास्यति" इति उक्त्वा समीरस्य हस्तं गृहीत्वा ततः प्रस्थितवान् अपूर्वः। यदा वेगः अधिकः जातः तदा आकाशे उड्डयनस्य अनुभवः प्राप्तः समीरेण। अल्पे एव काले तौ समुद्रतीरं प्राप्तवन्तौ।

नदीसमुद्रसङ्गमे, तीरात् अनतिदूरे काचित् महानौका स्थिता आसीत्।

"समीर! अद्य पञ्च बालकाः विहारार्थम् अत्र समुद्रतीरम् आगताः आसन्। तैः एषा महानौका दृष्टा। नौकायाः अन्तः अपि द्रष्टव्यम् इति बालकानां कुतूहलम्। ते धैर्येण गत्वा नौकानायकं दृष्ट्वा नौकादर्शनेच्छां निवेदितवन्तः। नौकानायकः मधुरैः वचनैः व्यवहरन् नौकास्थानि वस्तूनि, विविधान् प्रकोष्ठान् च प्रदर्शितवान्। सर्वं दृष्ट्वा बालकाः उक्तवन्तः– "विलम्बः जातः। वयं गृहं गच्छामः" इति। तदा नौकानायकः बालकेभ्यः मधुरं पानीयं दत्तवान्। तत् पीत्वा बालकाः गाढनिद्रामग्नाः जाताः। अल्पे एव काले एषा नौका इतः प्रस्थानं करिष्यति। 'दूरस्थं द्वीपं नीत्वा एते बालाः दासरूपेण विक्रेतव्याः' इति नौकानायकस्य इच्छा" इति उक्तवान् अपूर्वः।

"एतत्सर्वं कथं ज्ञातवान् भवान्?" इति कुतूहलेन पृष्टवान् समीरः।

"बालाः लघुनौकया नीयमानाः दृष्टाः मया। एतेषां नौकास्थानां मुखदर्शनतः एव ज्ञातं यत् एते दुर्व्यवहारे मग्नाः इति। अतः अहम् एतान् रहसि अनुसृतवान्। नौकायाम् एतेषां वार्तालापं श्रुतवान्। ततः एतेषां दुर्व्यवहारः स्पष्टं ज्ञातः" इति उक्तवान् अपूर्वः।

"महानौकायाः समीपं कथं गतवान् भवान्?" इति पृष्टवान् समीरः।

"मुनेः अनुग्रहतः अहम् असाध्यम् अपि कार्यं साधयिष्यामि। तदस्तु, एते बालकाः दुष्टानां वञ्चनाजालतः विमुक्ताः यथा स्युः तथा करणीयं खलु भवता?" इति उक्तवान् अपूर्वः।



"भवान् तु आत्मनः रक्षणे निगूहने च समर्थः। किन्तु मम तादृशं सामर्थ्यं नास्ति खलु? यदि अहं महानौकां गच्छेयं तर्हि दुष्टैः बद्धः भवेयम्" इति उक्तवान् समीरः।

"तदर्थं योग्यम् उपायम् अहं सूचयिष्यामि। मया यथा सूच्यते तथा भवान् करोति चेत् न कोऽपि अपायः भवतः। इदानीम् आवाभ्यां समुद्रप्रयाणं करणीयम्। तदर्थं सिद्धः वा भवान्?" इति पृष्टवान् अपूर्वः।

"भवतः सूचनां शिरसा धरामि" इति उक्तवान् समीरः।


अनन्तरम् अपूर्वः समुद्रं पश्यन् षीष्कारं कृतवान्। अनन्तरक्षणे एव महातरङ्गः उद्गतः। तेन तरङ्गेण सह चत्वारः महामीनाः तरन्तः आगत्य तीरं प्राप्तवन्तः। अपूर्वः समीरस्य हस्तं गृहीत्वा अग्रे गतवान्। तौ एकैकं मीनम् आरूढवन्तौ। तौ च मीनौ महानौकाम् उद्दिश्य वेगेन प्रस्थितवन्तौ। अपूर्व-समीरयोः रक्षणार्थम् अन्यौ द्वौ मीनौ तौ अनुसृतवन्तौ।

"भवान् तु आकारेण अत्यल्पः। एतादृशः भवान् एतान् महतः मीनान् कथं स्वाधीनीकृतवान्?" इति पृष्टवान् समीरः।

"मया एते न स्वाधीनीकृताः। दिव्यात्मा समग्रं प्रपञ्चम् अभिव्याप्य तिष्ठति। मानव-पशु-पक्षि-कीटादिष्वपि तस्य दिव्यात्मनः अंशाः भवन्ति एव। स्वस्मिन् स्थितं दिव्यात्मांशं स्मृत्वा कोऽपि सन्देशः प्रेष्यते चेत् अस्माकं मनसि स्थितः प्राणी अस्मदिच्छायाः अनुगुणं व्यवहरिष्यति। किन्तु एवं करणसमये अस्माकं भावशुद्धिः स्यात्। उदात्तकार्यम् अस्माकं लक्ष्यं स्यात्। तदा एव प्राणिनः अस्मदनुकूलं व्यवहरिष्यन्ति। आत्मसन्देशप्रेषणद्वारा अहम् एतान् मीनान् मदनुकूलान् कृतवान्। एतच्च तत्त्वं मुनेः अनुग्रहतः ज्ञातं मया" इति उक्तवान् अपूर्वः।

"एवं तर्हि भवान् मानवान् अपि स्वानुकूलान् कर्तुं शक्नुयात् खलु?" इति पृष्टवान् समीरः।

"तत् तु कष्टकरं कदाचित्।



मानवेतरजीविनां स्वभावः समानः। किन्तु मानवस्वभावः सर्वथा विभिन्नः। मानवस्य बुद्धिमत्ता भवति। अतः सः प्रकृत्यधीनः न भवति। तस्य व्यवहारे मनसः पात्रत्वम् अधिकम्। मनसि सदापि समुद्रे तरङ्गाः इव विचाराः, प्रश्नाः, सन्देहाः च उद्भवन्ति। तदा तु प्राकृतिकस्वभावस्य गौणत्वम्। ये सत्यवादिनः, निष्कल्मषहृदयाः, स्नेहपराः च भवन्ति ते तु आत्मसन्देशं श्रोतुम् अर्हन्ति'' इति उक्तवान् अपूर्वः।

एवं वार्तालापं कुर्वन्तौ तौ महानौकायाः समीपम् आगतवन्तौ। गाढान्धकारमयी रात्रिः सा। समुद्रतरङ्गशब्दं विना नान्यः शब्दः श्रूयते तत्र। मीनौ समीरम् अपूर्वं च उन्नीतवन्तौ। एतौ वातायनद्वारा नौकायाः अन्तः दृष्टिं प्रसारितवन्तौ। सुखनिद्रायां निमग्नाः शयानाः बालाः दृष्टाः ताभ्याम्। पानीयजनितायाः मूर्च्छातः इतोऽपि न विमुक्ताः ते। यत्र बालाः शयिताः सन्ति स च प्रकोष्ठः बहिस्तात् दृढेन तालेन कीलितः आसीत्। अल्पाकारः समीरः वातायनद्वारा अन्तः प्रविश्य वातायनफलकम् अपसारितवान्। तदा तु वातायनरन्ध्रं विशालं जातम्। समीरः अपि अन्तः गतवान्।

एवं महानौकां प्रविष्टौ तौ निश्शब्दं गत्वा नौकायाः अन्यस्मिन् प्रकोष्ठे दृष्टिं प्रसारितवन्तौ। तत्र सहचरेण सह चर्चायां मग्नः नौकानायकः ताभ्यां दृष्टः। तस्मिन् प्रकोष्ठे खड्गाः, दण्डाः, शूलानि, अन्यानि विचित्राणि आभरणानि च बहूनि आसन्। नौकानायकस्य सम्भाषणात् अपूर्वसमीराभ्यां ज्ञातं यत् समुद्रचोराणां नौका एषा इति।

''यावत् एतेषां बालानां मातापितरः एतान् अन्विष्यन्तः अत्र न आगच्छेयुः ततः पूर्वम् एव इतः निर्गन्तव्यम् अस्माभिः'' इति उक्तवान् नौकानायकः।

''आगच्छन्तु ते। किं तेन? अनुमतिं विना कोऽपि एतां महानौकाम् आरोढुं न शक्नोति खलु? अतः का हानिः अस्माकम्?'' इति पृष्टवान् उपनायकः।

''कोऽपि अस्मद्विषये सन्देहं यथा न प्राप्नुयात् तथा व्यवहरणीयम् अस्माभिः।

यदि कश्चित् अस्मद्विषये सन्देहं प्राप्नुयात् तर्हि भाविजीवनं कष्टकरं भवेत्'' इति उक्तवान् नौकानायकः।

अनन्तरं तौ ततः निर्गतवन्तौ। नायकस्य आज्ञायाः अनुगुणं नौका ततः प्रस्थिता।

''समीर! नौकानायकः अत्र यदाकदापि आगच्छेत्। अतः भवान् बालानां मध्ये शयनं करोतु। अग्रे किं करणीयम् इति समये सूचयिष्यामि'' इति उक्तवान् अपूर्वः।

अपूर्वस्य सूचनां शिरसा वहन् समीरः बालकानां मध्ये निद्रां प्राप्तवान् इव शयनं कृतवान्। अल्पे एव काले तालापनयनशब्दः श्रुतः। नौकानायकः अन्तः आगतवान्। उपनायकः तेन सह आसीत्। अपूर्वः झटिति निलीय स्थितवान्।

''एतान् रत्नद्वीपं खलु नयामः?'' इति पृष्टवान् उपनायकः।

''तत्र गमनं, मास्तु इदानीम्। समीपस्थं शुक्तिद्वीपम् एव नयाम। विभिन्नेभ्यः देशेभ्यः आगताः दासवणिजः तत्र मेलिष्यन्ति। तत्रैव एते बालकाः अधिकेन मूल्येन विक्रेतुं शक्याः'' इति उक्तवान् नौकानायकः।

प्रकोष्ठे प्रकाशः मन्दः आसीत्। उपनायकः अग्रे गत्वा वर्तिकायाः मालिन्यम् अपनीय दीपं कान्तियुक्तं कृतवान्।

सुप्तान् बालकान् दूरात् एव पश्यन् नौकानायकः— ''एकैकः अपि शतरूप्यकात्मकं मूल्यम् अर्हेत्। तर्हि एतेषां



विक्रयणेन पञ्चशतं रूप्यकाणि प्राप्यन्ते मया'' इति संसन्तोषम् उक्तवान्।

''कीदृशी गणना भवतः? शतं षड्भिः गुणितं चेत् पञ्चशतं कथं प्राप्यते?'' इति बालकानां समीपे स्थितः उपनायकः उक्तवान्।

''किं रे प्रलपति? पञ्च बालाः मया एव आनीताः। कथं ते षट् भवेयुः'' इति उक्तवान् आसने उपविष्टः नायकः।

''अत्र षट् दृश्यन्ते इति तु सुस्पष्टम्'' इति उक्तवान् उपनायकः।

''मूर्ख! गणितं कञ्चित् पुनर्गणितवान् स्यात् भवान्। पञ्चानां गणनायाम् अपि असमर्थः भवान् किं वा साधयेत् जीवने?''



सम्यक् ज्ञात्वा किमपि वक्तव्यम्, उपहासः करणीयः वा। अस्तु नाम, भवता उपहासः कृतः यत् तदर्थं क्षमा प्रार्थनीया इति अहं तु न वदामि'' इति वदन् उच्चैः हसितवान् उपनायकः।

''रे उद्धत! माम् उपहसन् अट्टहासं करोति वा मम पुरतः? कियत् धाष्टर्यं भवतः?'' इति वदन् खड्गम् उन्नीतवान् नायकः।

''मया कः दोषः आचरितः? मयि भवता अर्पितं वचनं प्रत्यर्पितं, तावदेव'' इति वदन् द्वित्राणि पदानि पृष्ठतः स्थापितवान् उपनायकः।

''अविधेय! अविवेकिन्! दर्पोद्धत! नायकः अहं कथम् आदरेण द्रष्टव्यः इति पाठयिष्यामि इदानीम्। मूर्ख! अहङ्कारिन्!'' इति क्रोधेन उच्चैः उक्तवान् नायकः।

नायकस्य एतत् आक्रोशनं श्रुत्वा सहचराः सर्वे तत्र सम्मिलिताः। नायकोपनायकयोः परस्परद्वेषः अस्ति इति ते जानन्ति स्म। 'क्षुल्लकेन कारणेन स च द्वेषः एवं विस्फोटितः भवेत्' इति तैः न निरीक्षितम् आसीत्।


''रे तूष्णीं तिष्ठतु। नायकः अहम् इति गर्वः भवतः। भवान् यद्यत् अपमाननं करोति तत्सर्वं मौनं सोढव्यं खलु अस्माभिः? भवतः स्वेच्छावृत्तिः किमर्थं सोढव्या? मां किं कुर्यात् भवान्? भवतः शौर्यम् अहं न जानामि वा? खड्गः भवतः अलङ्काराय'' इति उत्तरं दत्तवान् उपनायकः।

इति उपहसितवान् नायकः।

''अदृष्ट्वा उपहासः न उचितः। समीपम् आगत्य गणयित्वा स्वयं जानातु – कति सन्ति अत्र इति'' इति कोपेन उक्तवान् उपनायकः।

नायकः आसनात् उत्थाय अग्रे आगत्य बालान् गणितवान्। वस्तुतः अपि षट् दृश्यन्ते! दीपं हस्तेन स्वीकृत्य एकैकस्य अपि मुखं परिशीलयन् द्विवारं गणितवान् नायकः। तस्य मुखे आश्चर्यरेखाः दृश्यन्ते।

''कथम् एतत् सम्पन्नम् इति आश्चर्यं वा? यथाकथमपि जातं स्यात्? किं तेन कारणान्वेषणेन? शतं रूप्यकाणि अधिकतया प्राप्यन्ते इति तु सन्तोषाय एव खलु? विषयं



"रे,मम खड्गस्य तीक्ष्णतां पश्यतु तावत्" इति वदन् क्रोधम् उद्वमन् उपनायकस्य उपरि आक्रमणं कृतवान् नायकः।

उपनायकः झटिति उत्प्लुत्य पार्श्वं गतवान्। स्वकीयं खड्गम् आकृष्य नायकस्य उरसि बलात् प्रहृतवान्। नायकः आर्तस्वरेण आक्रन्दनं कुर्वन् अधः पतितवान्।

सर्वे सहचराः आश्चर्येण भीत्या च शिलाप्रतिमाः इव मौनं स्थितवन्तः।

उपनायकः उच्चैः अट्टहासं कुर्वन्– "येन क्रमेण एतेन पूर्वतनः नायकः मारितः आसीत् तेनैव क्रमेण एषः मारितः मया। किन्तु एषः मया आत्मरक्षणार्थं मारितः। अन्यच्च पञ्चषडित्येतयोः भेदम् एव यः ज्ञातुं न शक्नोति सः अस्माकं नायकः कथं स्यात्? इतःपरम् अहं नायकः। एतस्य दुष्टस्य शवं समुद्रे क्षिप्त्वा स्वकर्मणि उद्युक्ताः भवन्तु भवन्तः" इति आज्ञां कृतवान्।

तस्य आज्ञां पालयन्तः केचन सहचराः अग्रे आगत्य शवम् उन्नीय समुद्रे क्षिप्तवन्तः। अनन्तरं सर्वे ततः निर्गताः।

एतस्य कोलाहलस्य कारणतः बालाः जागरिताः अभवन्। 'इतः बहिर्गमनं कथम्?' इति चिन्तयन्तः ते वातायनतः बहिः दृष्टिं प्रसारितवन्तः। तदा समीरः दीपं निर्वाप्य मन्दस्वरेण उक्तवान्– "मित्राणि! निद्राजनकं पानीयं पाययित्वा वञ्चनया भवतः सर्वान् नयन्तः सन्ति एते दुष्टाः। दासरूपेण भवन्तः विक्रेतव्याः इति एतेषां योजना। उपायेन आत्मरक्षणं करणीयम् इदानीम्। भवन्तः मिथ्यानिद्राम् अभिनयन्तः पुनरपि शयनं कुर्वन्तु। क्षुल्लकं कारणं व्याजं प्रकल्प्य उपनायकेन नायकः मारितः। एतत् अजानन्तः इव व्यवहरेम वयम्। अन्यथा ते अस्मान् कारागारे स्थापयेयुः। अतः केनापि प्रमादः न करणीयः" इति।

'एषः नूतनः कथम् अत्र आगतः?' इति आश्चर्यम् अनुभवन्तः ते तदीयां सूचनां पालयन्तः मौनं शयनं कृतवन्तः।

–(अनुवर्तते)






## ७

(सत्यानन्दमुनिना सृष्टः अपूर्वः समुद्रचोरैः अपहृत्य नीतानां पञ्चानां बालकानां रक्षणार्थं समीरेण सह महामीनान् आरुह्य नौकासमीपं गतवान्। नौकायां क्षुल्लकस्य कारणस्य हेतोः नायकोपनायकयोः कलहः जातः। उपनायकेन नायकः मारितः। समुद्रचोराः तान् बालकान् दासरूपेण विक्रेतुं योजनां कृतवन्तः आसन्। तदनन्तरम्.....)

उपनायकस्य नायकत्वं सर्वे सहचराः विना विरोधम् अङ्गीकृतवन्तः। एतत् दृष्टवतः उपनायकस्य मुखं विकसितम् अभवत्।

उषःकालः अतीतः। पूर्वाचलः अरुणकान्त्या शोभमानः जातः। तदा उपनायकः बालानां प्रकोष्ठं प्रविश्य बालान् उत्थापयन्– "भोः, मित्राणि! उत्तिष्ठन्तु तावत्। समुद्रे दृश्यमानस्य सूर्योदयस्य विलक्षणा शोभा। ताम् अपूर्वां शोभां पश्यन्तः सन्तोषम् अनुभवन्तु। झटिति उत्तिष्ठन्तु तावत्" इति उक्तवान्।

समीरस्य सूचनायाः अनुगुणं गाढनिद्रां प्राप्तवन्तः इव सुप्ताः बालाः जागरणम् अभिनयन्तः मन्दं नेत्रे उन्मील्य परितः पश्यन्तः उत्थितवन्तः। एकः बालकः उपनायकं पृष्टवान्– "वयं कुत्र स्मः? कः भवान्?" इति। अन्येषां मुखे अपि एषः एव प्रश्नभावः स्फुटं दृश्यते स्म।



"अहम् एतस्याः नौकायाः स्वामी। गरलकण्ठः इति मम नाम" इति उक्तवान् उपनायकः।

"यदा वयं नौकां प्रविष्टवन्तः तदा अन्यः कश्चित् 'अहं नौकानायकः' इति वदन् नौकास्थं विशेषं प्रदर्शितवान् खलु? एवं तर्हि नौकानायकः भवान् वा, सः वा?" इति आश्चर्यं प्रकटयन् पृष्टवान् समीरः।

"यदा भवन्तः नौकां प्रविष्टवन्तः तदा सः एव नायकः आसीत्। प्रमुखस्य कार्यस्य निमित्तं सः इतः सुदूरं प्रेषितः। अतः अहम् इदानीं नायकः अस्मि। भवन्तः विशेषादरेण द्रष्टव्याः इति सूचयित्वा गतवान् अस्ति सः। भवन्तः इदानीं नौकायां सन्ति। नौका समग्रतया दृष्टा भवद्भिः। नौका यदा समुद्रे गच्छति तदा समुद्रस्य आकाशस्य च अन्या एव शोभा। सा च शोभा भवद्भिः द्रष्टव्या खलु?" इति उक्तवान् गरलकण्ठः।

समीरः उत्थाय आश्चर्यं प्रकटयन् परितः दृष्ट्वा– "अहो, गृहात् आगतानाम् अस्माकं महान् कालः अतीतः। अस्माभिः इदानीं गृहं गन्तव्यम्" इति उक्तवान्।

अट्टहासः करणीयः इति भावना आगता गरलकण्ठस्य मनसि। तं भावं बलात् निगृह्य सहजस्वरेण उक्तवान् सः– "वस्तुस्थितिः का इति न जानामि अहम्। यदा अस्माकं नायकः इतः प्रस्थितः तदा भवन्तः गाढनिद्रायां लीनाः आसन्। रात्रौ यथासमयं नौका प्रस्थिता। निद्रामग्नान् भवतः उत्थापयितुं न इष्टवान् अहम्। इदानीं प्रातःकालसमयः। नौका च तीरतः सुदूरम् आगता अस्ति। इदानीम् इतः प्रतिगमनं सर्वथा असाध्यम्। समुद्रे महातरङ्गाः, महामीनाः, मकराः, तिमिङ्गिलाः च भवन्ति। अतः तरणेन प्रतिगमनम् अपि असाध्यम्। गृहविचारं विस्मृत्य सन्तोषेण परितः पश्यन्तः समुद्रविहारसुखम् अनुभवन्तु तावत्" इति।

किम् उत्तरं वक्तव्यम् इति अजानन्तः बालाः परस्परं मुखं पश्यन्ति। यः धैर्यवचनानि उक्तवान् सः समीरः एव योग्यम् उत्तरं वदेत् इति चिन्तयित्वा ते समीरं

दृष्टवन्तः।

"इदानीं तर्हि अस्माकं का गतिः? अस्मान् कुत्रापि अपश्यन्तः गृहसदस्याः दिग्भ्रान्ताः खिन्नाः च भवेयुः खलु?" इति चिन्तां प्रदर्शयन् उक्तवान् समीरः।

"यत् प्रवृत्तं तद्विषये अधिकचिन्ता न करणीया। केषाञ्चित् दिनानाम् अनन्तरं वयं पुनरपि तीरं प्राप्स्यामः। तदा अहम् एव भवतां गृहम् आगत्य भवतां मातापितॄणां सान्त्वनं करिष्यामि। अतः चिन्तां मा कुर्वन्तु" इति उक्तवान् गरलकण्ठः।

"वयं तु साहसयात्रायाम् उत्साहिनः एव। किन्तु अस्माकं मातापितॄणाम् एव चिन्ता। ते निश्चयेन चिन्ताक्रान्ताः स्युः एव" इति खेदेन उक्तवान् अन्यः बालकः।

"चिन्ता मास्तु इति उक्तं खलु मया। किञ्चित्कालं ते चिन्ताम् अनुभवेयुः। किन्तु अनन्तरकाले दशगुणितं सन्तोषम् अनुभविष्यन्ति ते" इति हसन् उक्तवान् गरलकण्ठः।

"अस्तु तावत्। ज्येष्ठाः अनुभवशालिनः भवन्तः यथा वदन्ति तथा भवतु नाम" इति उक्तवान् समीरः।

एतेन अङ्गीकारेण गरलकण्ठः नितरां सन्तुष्टः। "आगच्छन्तु तावत्" इति वदन् तैः सह ततः निर्गतवान् सः।

सर्वे सूर्योदयदर्शने मग्नाः आसन्। तदा अपूर्वेण कृतः क्षीणः आह्वानध्वनिः श्रुतः समीरेण। सः मन्दं ततः निर्गत्य निर्जने नौकाभागे स्थितवान्। अवनम्य समुद्रे दृष्टिं





स्थितम् ऐश्वर्यं वशीकर्तुम् इच्छन्ति। कार्यसाधनार्थं ते भवतः उपयोक्तुम् अपि अर्हन्ति। अतः जागरूकतया पदानि स्थापयन्तु भवन्तः। वाणिज्यनौकायाः जनाः अस्माकं साहाय्यं कर्तुम् अर्हन्ति। पश्याम तावत्'' इति।

अवनम्य समुद्रं पश्यन्तं समीरम् उक्तवान् गरलकण्ठः– ''भोः, तथा अवनम्य समुद्रं मा पश्यतु। समुद्रे पतेत् भवान्। समुद्रे पतति चेत् तिमिङ्गिलाः भवन्तं निश्चयेन गिलन्ति। अतः जागरूकः भवतु। अलं समुद्रदर्शनेन। अत्र आगच्छतु तावत्'' इति।

समीरः गरलकण्ठं पश्यन् हसन् बालैः सह मिलितवान्। अनन्तरं सर्वे भोजनार्थम् उपविष्टवन्तः। भोजनसमये गरलकण्ठं पृष्टवान् समीरः– ''नौकायाम् अत्र स्थितानां भवताम् उद्योगः कः? दर्शनेन तु भाति यत् भवतां सर्वेषां धनानुकूल्यं सम्यक् अस्ति इति। एवं तर्हि भवताम् उद्योगः कः?'' इति।

प्रसारितवान् च।

अनतिदूरे महामीनस्य उपरि स्थितः अपूर्वः दृष्टः समीरेण। समीरं दृष्ट्वा अपूर्वः समीपम् आगतवान्।

महामीनस्य पुच्छस्य उपरि स्थित्वा, समीरः श्रोतुं यथा शक्नुयात् तादृशेन मन्दस्वरेण उक्तवान् अपूर्वः– ''भवन्तः इतः पलायनार्थम् उपायं चिन्तयन्तः सन्ति इति चोरैः ज्ञातं चेत् ते भवतः सर्वान् चित्रहिंसया पीडयित्वा मारयेयुः। अतः जागरूकाः भवन्तु। ते भवद्भिः सह मृदुतया व्यवहरन्तः सन्ति इत्यस्य अर्थः सिध्यति यत् ते भवद्भ्यः किमपि निरीक्षन्ते इति। सद्यः एव वणिजां काचित् नौका समीपम् आगच्छति इति मया तेषां वार्तालापतः ज्ञातम्। ते तस्यां नौकायां

''आं, वयम् आढ्याः वणिजः। दौर्भाग्यवशात् सद्यः एव लुण्ठाकैः वयं लुण्ठिताः अभवाम'' इति उक्तवान् गरलकण्ठः।

''अहो दारुणा गतिः भवताम्'' इति विषादेन उक्तवान् समीरः।

''आम्। इदानीं दयनीया अवस्था अस्माकम्। ते दुष्टाः हठात् आक्रमणं कृत्वा सर्वस्वं लुण्ठितवन्तः'' इति दुःखमिश्रितेन

स्वरेण उक्तवान् गरलकण्ठः।

"अहो दुर्विधिः! सज्जनानां भवताम् एतादृशी दुर्गतिः न भवेत्। भवन्तः सज्जनाः इत्यतः अस्मान् एवं विहारार्थं नयन्तः सन्ति। उपाहार-भोजनदानादिभिः सत्कुर्वन्तः सन्ति। तदस्तु, इदानीं भवताम् अग्रिमयोजना का?" इति पृष्टवान् समीरः।

"प्रथमं समीपस्थं कञ्चित् द्वीपं प्राप्स्यामः। तत्र गत्वा धनसम्पादनमार्गं चिन्तयिष्यामः" इति उक्तवान् गरलकण्ठः।

"वयं वणिजः इति वदन्ति भवन्तः। किन्तु नौकायां वस्तूनि एव न दृश्यन्ते खलु? एवं स्थिते धनसम्पादनं केन मार्गेण करिष्यन्ति भवन्तः?" इति पृष्टवान् समीरः।

"युक्तः प्रश्नः पृष्टः भवता। बालस्यापि भवतः बुद्धिमत्ता तीक्ष्णा अस्ति। अस्माकं समीपे वस्तूनि न सन्ति इति तु सत्यम्। तथापि धनसम्पादनार्थं मार्गं जानीमः वयम्। भवन्तः यदि साहाय्यं कुर्युः तर्हि धनसम्पादने न कोऽपि क्लेशः" इति हसन् उक्तवान् गरलकण्ठः।

"समुद्रमध्ये कथं वा धनं सम्पादयितुं शक्येत? वयं बालाः कथं वा अत्र साहाय्यं कर्तुं शक्नुयाम? आश्चर्यकरम् अस्ति भवतः वचनम्" इति उक्तवान् समीरः।


"अस्माकं नौकां ये लुण्ठितवन्तः ते लुण्ठाकाः सद्यः एव एतेन मार्गेण आगमिष्यन्ति। यदा ते समीपम् आगमिष्यन्ति



तदा वयं विषादसूचकं कृष्णवर्णीयं ध्वजम् उड्डाययिष्यामः। तदा भवन्तः सर्वे नौकायाः पार्श्वभागे स्थित्वा "रक्षन्तु, रक्षन्तु" इति उच्चैः आक्रोशनं कुर्युः" इति एतावत् उक्त्वा सर्वेषां बालानां मुखानि दृष्टवान् गरलकण्ठः।

"एवं करणेन कः लाभः सेत्स्यति?" इति पृष्टवान् समीरः।

"भवताम् आक्रोशनं श्रुत्वा वणिग्वेषधारिणः ते लुण्ठाकाः साहाय्यार्थं समीपम् आगमिष्यन्ति। तदा भवन्तः– 'दुष्टाः केचन लुण्ठाकाः हठात् आक्रमणं कृत्वा अस्मदीयान् सर्वान् मारयित्वा धनादिसर्वस्वं नीतवन्तः' इति रोदनपूर्वकं वदन्तु। भवतां विलपनं श्रुत्वा तेषु केचन अस्माकं नौकाम्



आगमिष्यन्ति। तान् भवन्तः अस्माकं प्रकोष्ठम् आनयन्तु। तत्र यत् करणीयं तत् करिष्यामः वयम्'' इति उक्तवान् गरलकण्ठः।

''अपूर्वः उपायः एषः'' इति उक्तवान् कश्चन बालकः। ''आम्, आम्'' इति उक्तवन्तः अन्ये बालकाः।

''वयं यथा वदामः तथा आचरिष्यन्ति चेत् भवतः सर्वान् विशेषतः सत्करिष्यामः वयम्'' इति उक्तवान् गरलकण्ठः।

''वयम् एतत् कर्तुं सिद्धाः। वयं तान् भवतां समीपं प्रेषयिष्यामः चेत् भवन्तः तान् किं करिष्यन्ति?'' इति कुतूहलेन पृष्टवान् समीरः।

गरलकण्ठः क्षणकालं गाम्भीर्येण मौनं स्थितवान्। अनन्तरं दीर्घं निश्श्वस्य उक्तवान् सः– ''ते दुष्टाः यत् दौष्ट्यम् आचरितवन्तः तदर्थं ते निर्दयं मारिताः चेदपि न दोषः। किन्तु तान् मारयितुं न इच्छामि अहम्। तान् सर्वान् बन्धने स्थापयिष्यामि, तेषां नौकां स्वाधीनीकरिष्यामि च। अनन्तरं तान् दासरूपेण विक्रेष्यामि। मारणस्य अपेक्षया अपि दासरूपेण विक्रयणं दयापूर्णं कार्यं खलु?'' इति।

तावता गरलकण्ठस्य आप्तसाहाय्यकः अन्तः आगत्य– ''नौका अनतिदूरे दृश्यते'' इति उक्तवान्।

''साधु! अस्माकं नौकां वेगेन तेषां नौकायाः समीपं नयन्तु। यदा तन्नौकास्थाः जनाः दृश्यन्ते तदा अरित्रं बालानाम् अधीनं कृत्वा भवन्तः सर्वे प्रकोष्ठे निलीय तिष्ठन्तु। सर्वे जागरूकतया व्यवहरन्तु। केनापि अल्पः प्रमादः अपि न करणीयः'' इति सूचितवान् गरलकण्ठः।

गरलकण्ठः अन्ये बालाः च प्रकोष्ठतः बहिः आगतवन्तः। अनतिदूरे वणिजां नौका दृष्टा। एतेषां नौका वायुवेगेन गच्छन्ती अस्ति। यदा वणिजां नौका समीपम् आगता तदा गरलकण्ठस्य कथनस्य अनुसारं चोराः अरित्रं बालाधीनं कृत्वा निलीय स्थितवन्तः।

समीरः नौकायाः उपरितनं भागम् आरुह्य वणिजः यथा द्रष्टुं शक्नुयुः तथा स्थितवान्। तदा तेन दृष्टं यत् कश्चन समुद्रकाकः

तदीयनौकातः वणिङ्नौकां प्राप्नोत् इति। काकस्य द्वारा अपूर्वेण कोऽपि सन्देशः प्रेषितः स्यात् इति तर्कितवान् समीरः।


तावत्पर्यन्तं सहचरैः कृतं कार्यं परिशील्य दण्डे कृष्णवर्णीयं ध्वजं बद्ध्वा– "भोः, ते वणिग्वेषधारिणः भवता एव अस्मत्प्रकोष्ठम् आनेतव्याः। एतत् भवतः दायित्वम्" इति आदिश्य प्रकोष्ठं प्रविश्य सहचरैः सह उपविष्टवान् गरलकण्ठः।

समीरः उच्चध्वनिना आक्रोशनं कृतवान्– "रक्षन्तु भोः, रक्षन्तु" इति।

एतत् आक्रोशनं श्रुत्वा वणिङ्नौकाप्रकोष्ठतः आढ्यः वणिक् कश्चित् बहिः आगतवान्। तम् उभयतः दृढकायाः केचन अङ्गरक्षकाः आसन्।

"एतस्यां नौकायां वयं षट् बालकाः केवलं स्मः। समुद्रचोराः अस्मदीयान् सर्वान् मारितवन्तः। कृपया रक्षन्तु अस्मान्" इति पुनरपि उक्तवान् समीरः।

अनन्तरक्षणे वणिजां नौका एतेषां नौकायाः अतिसमीपम् आगता। द्वित्राः दृढकायाः दीर्घं दृढं काष्ठफलकं सेतुरूपेण नौकयोः मध्ये स्थापयित्वा सम्पर्कं कल्पितवन्तः। तदाधारेण सः आढ्यः पुरुषः चोरनौकाम् आगतवान्। दृढकायाः केचन तम् अनुसृत्य आगतवन्तः। सः आढ्यः वणिक् समीरस्य समीपम् आगत्य–. "ते दुष्टाः कुत्र? प्रदर्शयतु तावत्" इति उक्तवान्।



चोरैः यत्र निगूह्य स्थितं तं प्रकोष्ठं प्रदर्श्य समीरः– "आगच्छन्तु श्रीमन्! चोराणां चौर्यस्य अनन्तरम् अपि अवशिष्टानि कानिचन आभरणानि प्रकोष्ठे सन्ति। तानि भवन्तः एव स्वीकुर्वन्तु नाम। अस्मान् तु सकुशलं गृहं प्रापयन्तु" इति उक्तवान्।

"चिन्तां मा कुर्वन्तु भवन्तः। भवतां रक्षणार्थम् एव आगताः स्मः वयम्" इति उक्त्वा सः आढ्यः वणिक् समीरेण प्रदर्शितस्य प्रकोष्ठस्य समीपं झटिति गत्वा द्वारं पिधाय बहिस्तात् तालेन कीलितवान्।

अनन्तरं वातायनद्वारा अन्तः दृष्टिं प्रसार्य– "भोः दुष्टाः! अद्य भवतां पापघटः पूर्णः इति भावयन्तु। मया सह विंशतिः

दृढकायाः सहचराः सन्ति। ते एतं प्रकोष्ठं परितः आयुधं धृत्वा तिष्ठन्ति। यदि कश्चित् विरोधं प्रदर्शयेत्, कश्चित् पलायनार्थं प्रयत्नं वा कुर्यात्, तर्हि सः निर्दयं मार्यते अस्माभिः। समूहप्रयत्नः कोऽपि भवद्भिः कृतः चेत् समग्रां नौकां दहामः वयम्। यतः तावान् तैलसङ्ग्रहः अस्माकं समीपे अस्ति एव। श्वः सायङ्कालाभ्यन्तरे वयं तीरं प्राप्स्यामः। तावत्पर्यन्तं कोऽपि आहारः न दीयते भवद्भ्यः। पानार्थं तदा तदा जलं दीयते, तावदेव। प्राणाः प्रियाः चेत् वयं यथा वदामः तथा आचरन्तु" इति उक्तवान्।

यत्र चोराः बन्धने स्थापिताः तं प्रकोष्ठं परितः दश दृढकायाः आयुधानि गृहीत्वा रक्षणार्थं स्थितवन्तः। अन्ये केचन दृढाभिः रज्जुभिः चोरनौकां स्वनौकया सह योजितवन्तः।

'अत्रान्तरे अपूर्वः कुत्र?' इति परीक्षादृष्ट्या परितः पश्यन् अस्ति समीरः। तदा वणिक्प्रमुखः तस्य समीपम् आगत्य तस्य स्कन्धस्य उपरि स्वस्य हस्तं स्थापयन् पृष्टवान्– "वत्स! काकद्वारा सन्देशं प्रेषयितुं कथं शक्तवान् भवान्?" इति।

"स च सन्देशः मया न प्रेषितः श्रीमन्! अस्माकं रक्षकेण केनचित् दिव्यपुरुषेण सः सन्देशः प्रेषितः। सः दिव्यपुरुषः आकारेण अत्यल्पः। दैवांशसम्भूतस्य तस्य सामर्थ्यं तु मेरुतुल्यम्। परोपकारः तस्य स्वभावसहजः गुणः। कीर्तिकामनारहितः सः सदापि प्रशंसाविमुखः" इति उक्तवान् समीरः।

"सः महानुभावः इदानीं कुत्र अस्ति?" इति कुतूहलातिशयेन पृष्टवान् वणिक्प्रमुखः।

"तत् अहम् अपि न जानामि। एतावत् तु जानामि यत् अस्माभिः यद्यत् क्रियते तत्सर्वं तेन दूरात् सूक्ष्मदृष्ट्या दृश्यते इति। अचिरात् एव सः अस्माकं सम्मुखम् आगच्छेत् अपि" इति उक्तवान् समीरः।

वणिजां नौका चोरनौकया सह तीरं प्रति वेगेन अगच्छत्। —(अनुवर्तते)





# अपूर्वस्य साहसगाथा

८

(अपूर्वस्य आदेशस्य अनुगुणं समीरः समुद्रचोरेभ्यः पञ्चानां बालकानां रक्षणार्थं गण्डमीनानां साहाय्येन चोरनौकां प्रविष्टवान्। सद्यः एव नायकत्वपदम् आरूढवान् गरलकण्ठः वणिजां नौकायाः लुण्ठनार्थं योजनां कृतवान् आसीत्। किन्तु सा एव तस्य तत्पक्षीयानां बन्धनस्य कारणं जाता। वणिजां नौका चोरनौका च तीरम् आगते। एतस्य सर्वस्य कारकः अपूर्वः एव इति उक्तवान् समीरः। तदनन्तरम्.....)

समीरमुखात् अपूर्वस्य असदृशं सामर्थ्यं श्रुत्वा नितरां सन्तुष्टः अभवत् वणिक्प्रमुखः। अनन्तरं सः तान् बालकान् गृहं प्रापितवान्। सकुशलं प्रत्यागतान् बालान् दृष्ट्वा तेषां मातापितरः नितरां सन्तुष्टाः। बालानां साहसयात्रावार्ता क्षणाभ्यन्तरे ग्रामे प्रसृता। ग्रामीणाः सन्तोषं प्रकटयन्तः उत्साहेन आगत्य बालान् अभिनन्दितवन्तः।

राजा गरलकण्ठं तदनुयायिनः च कारागारे संस्थाप्य कठिनपरिश्रमदण्डेन दण्डितवान्। समुद्रचोराणां ग्रहणं दण्डनं च प्रजानां प्रीत्यै अभवत्। राजा बालान् बहुधा श्लाघितवान्। तदा ते बालाः उक्तवन्तः यत् समीरस्य सूचनानुगुणम् अस्माभिः व्यवहृतं, तावदेव इति। राजा समीरं विशेषतः सत्कृतवान्।

प्रशंसां सत्कारं च भाराय भावयति समीरः। 'कार्ये या यशस्विता दृष्टा सा तु अपूर्वस्य अनुग्रहतः। अपूर्वः प्रशंसां सर्वथ



अनिच्छन् दूरे तिष्ठति। अतः एव राजादयः मम प्रशंसां कुर्वन्ति। 'प्रशंसार्थम् अर्हः न अहम्, अपि तु अपूर्वः' इति वदामि चेदपि कोऽपि तत्र न विश्वसिति। सर्वे प्रशंसाभारं मयि आरोपयन्ति' इति चिन्तयति समीरः।

सप्ताहाभ्यन्तरे सत्कारादिकोलाहलः समाप्तः। अनपेक्षितं प्रशंसाभारम् अनिवार्यतया वहन् समीरः गृहं प्रत्यागतवान्। गृहात् अनतिदूरे प्रशान्ते स्थले मौनं किञ्चित्कालम् उपविष्टवान् सः। 'अपूर्वः द्रष्टव्यः। सत्कारादिकं निवेद्य सर्वस्य भवान् एव पात्रम् इति उक्त्वा निश्चिन्तता प्राप्तव्या' इति चिन्तितवान् समीरः। 'सौहार्दभावेन एकाग्रचित्तेन यदा भवान् मां स्मरति तदा अहं भवतः पुरतः उपस्थास्यामि' इत्येतत् अपूर्वस्य वचनं स्मृतवान् समीरः।

समीरः समीपस्थायाः निर्झरिण्याः तीरं गत्वा शिलायाः उपरि उपविश्य नेत्रे निमील्य एकाग्रबुद्ध्या अपूर्वं गाढं स्मृतवान्। अनन्तरक्षणे एव समीपात् स्वरः श्रुतः– "समीर! अहम् अत्र अस्मि" इति।

मन्दहासपूर्वकं समीपे एव स्थितस्य अपूर्वस्य अपूर्वं शरीरं निर्निमेषं पश्यन् मौनं स्थितवान् समीरः।

"समीर! आवयोः मनसः समाना प्रवृत्तिः दृष्टा खलु? यदा भवान् मां द्रष्टुम् इष्टवान् तदा एव अहम् अपि भवतः दर्शनं चिन्तयन् आसम्। अतः भवान् मां स्मृतवान् यत् तेन मम महान् सन्तोषः जातः। झटिति अहम् उपस्थितः" इति मन्दहासपूर्वकम् उक्तवान् अपूर्वः।

अपूर्वस्य दर्शनात् आनन्दातिरेकात् च रोमाञ्चितः अस्ति समीरः। तस्य नेत्राभ्याम् आनन्दाश्रूणि आगतानि। प्रतिवचनं किमपि वक्तुं न शक्तवान् सः।

"परस्परदर्शनात् आवाभ्यां महान् आनन्दः प्राप्तः खलु? आनन्दः एव जीवनस्य सारः। अतः सर्वे आनन्दं प्राप्तुं यथा शक्नुयुः तथा कोऽपि प्रयत्नः करणीयः। भवतः ग्रामस्य स्थितिम् एव परिशीलयतु तावत्। कति निर्धनाः सन्ति! उदरपूरणार्थं तेषां न आहारः, मानरक्षणार्थं न पर्याप्तं वस्त्रम्।

शोचनीयावस्थायां सन्ति ते। तेषां मुखे अपि हासः यथा दृश्येत तथा किमपि करणीयम्" इति उक्तवान् अपूर्वः।

"किमपि करणीयम् इत्यत्र मम सहमतिः अस्ति श्रीमन्! मद्ग्रामे स्थितानां दरिद्राणां दयनीयां दशाम् अपि जानामि अहम्। किन्तु एतावता किं वा कर्तुं शक्येत? दारिद्र्यम् अपगतं चेदेव तेषां मुखे सन्तोषः दृश्येत। बालस्य मम हस्ते धनं कुतः? धान्यवस्त्रादीनि कुतः? एवं स्थिते किं वा कर्तुं शक्नुयाम् अहम्?" इति सविषादम् उक्तवान् समीरः।

"मित्र! समीर! 'श्रीमन्' 'महोदय' इत्येवं मम सम्बोधनं न करणीयम् इति मया पूर्वम् एव उक्तं खलु? मित्र इति एव आह्वयतु, तावता अलम्। यदि भवतः हस्ते धनं स्यात् तर्हि निर्धनानां साहाय्यं सेवां च कर्तुं सिद्धः वा भवान्? तर्हि धनं नास्ति इति चिन्तां परित्यजतु। धनं भवतः हस्ते यथा स्यात् तथा अहं करिष्यामि। अग्रे किं करणीयम् इति चिन्तयतु भवान्" इति उक्तवान् अपूर्वः।


"मित्र! ममापि भवति मैत्रीभावः एव अस्ति। तथापि भवतः महिमातिशयं स्मृत्वा श्रीमन् इति सम्बोधनं कृतं मया। अस्तु तावत्। इतः परं मित्र इत्येव सम्बोधयामि। किन्तु मम प्रश्नः– कथं भवान् धनं सम्पादयिष्यति? इति" इति उक्तवान् समीरः।

"यदा अहं समुद्रचोराणां नौकायाम् आसं



तदा मया तेषां वार्तालापतः ज्ञातं यत् कुत्रापि शिलाद्वीपे निहितः निधिः तैः ज्ञायते इति। दशाभ्यः वर्षेभ्यः पूर्वं काचित् नवोढा युवराज्ञी यदा पतिगृहं गच्छन्ती आसीत् तदा केचन लुण्ठाकाः हठात् आक्रम्य तस्याः सम्पत्तिं वशीकृतवन्तः इति श्रूयते। ..." इति यावत् अपूर्वः वदन् आसीत् तावता मध्ये उत्साहेन उक्तवान् समीरः– "आम्। मात्रादीनां मुखतः एषा घटना कथारूपेण श्रुता अस्माभिः" इति।

"आम्। तत्काले तु सर्वेषां मुखे एषा घटना एव विलसति स्म इति श्रूयते। अनर्घ्यैः मणिमाणिक्यादिभिः युक्तानि आभरणानि धनं च युवराज्ञीतः वशीकृत्य समुद्रचोराः



शिलाद्वीपे निगूहितवन्तः इति श्रूयते। आभरणविभागविषये चोराणां मध्ये विवादः उत्पन्नः। तेषां दलं द्विधा विभक्तम्। अधिकं भागं प्राप्तुं गणद्वयम् अपि उद्युक्तम् अभवत्। गणद्वयेन अपि समग्रं वशीकर्तुं वञ्चनामार्गः अपि आश्रितः। तदा तयोः गणयोः मध्ये युद्धम् एव प्रवृत्तम्। युद्धे बहवः मृताः। केचन तु भीत्या ततः पलायितवन्तः। एवं पलायितवत्सु अन्यतमः आसीत् एषः गरलकण्ठः। शिलाद्वीपं गत्वा कथमपि तत्रत्यम् ऐश्वर्यं प्राप्य सुखेन जीवनं यापनीयम् इति गरलकण्ठस्य योजना आसीत्। किन्तु सर्वं विपरीतं संवृत्तम्। सः इदानीं कारागारप्रकोष्ठस्य शलाकाः गणयति। गरलकण्ठादीनां वार्तालापतः एव मया शिलाद्वीपस्थस्य निधेः विषयः ज्ञातः" इति उक्तवान् अपूर्वः।

"एवं वा कथा? तर्हि सः गुप्तनिधिः अस्माभिः वशाकर्तुं शक्यः इति भाति। एवं ननु?" इति उक्तवान् समीरः।

"आम्। किन्तु त्वरया अस्माभिः कार्यप्रवृत्तैः भवितव्यम्। यतः स च निधिः तत्र चिरकालं न तिष्ठेत् इति भाति मम। स च निधिः प्राप्तव्यः इति गरलकण्ठगणः तद्विरोधिगणः च प्रयतमानः एव आसीत्। गरलकण्ठगणः कारागारे अस्ति इति ज्ञात्वा तद्विरोधिगणः त्वरया निधिवशीकरणार्थं प्रयत्नं कुर्यात् एव। ततः पूर्वम् एव अस्माभिः निधिः प्राप्तव्यः" इति उक्तवान् अपूर्वः।

"तत् तु सत्यम्। किन्तु शिलाद्वीपः कस्यां दिशि कियद्दूरे अस्ति इति कथं ज्ञातुं शक्नुयाम वयम्?" इति चिन्तामिश्रितेन स्वरेण पृष्टवान् समीरः।

"पूर्वं ये गण्डमीनाः अस्मान् सर्वान् चौरनौकासमीपं नीतवन्तः ते शिलाद्वीपविषये अपि जानीयुः एव। मम इङ्गितं ज्ञात्वा तदनुगुणं व्यवहरिष्यन्ति ते। अतः ते अस्मान् शिलाद्वीपं नेष्यन्ति। समुद्रकाकाः अपि अत्र मार्गं प्रदर्शयितुम् अर्हन्ति। अतः शिलाद्वीपस्य अन्वेषणार्थम् उपायम् अहं चिन्तयिष्यामि। श्वः पूर्णिमा। शिलाद्वीपं प्रति गमनार्थम् उत्तमं दिनं तत्। श्वः एव इतः प्रस्थानं करिष्यावः" इति उक्तवान् अपूर्वः।


अपूर्वस्य उत्साहवर्धकवचनेन सन्तुष्टः समीरः उत्साहेन उक्तवान्– "एवं तर्हि, चोरनौकातः मोचितान् पञ्च बालकान् अपि सहैव नेष्यामः वा वयम्? यतः ते अपि साहसकार्येषु उत्साहिनः एव। भवतः दर्शने अपि महत् कुतूहलम् अस्ति तेषाम्" इति।

अपूर्वः क्षणकालम् आलोच्य– "अस्तु तावत्" इति अङ्गीकारं प्रदर्श्य ततः निर्गतवान्।

समीरः तेषां बालानां मातापितॄणाम् अनुमतिं प्राप्य तैः बालैः सह अनन्तरदिने सायङ्कालसमये समुद्रतीरं प्राप्तवान्। ते पञ्च बालकाः अपि अपूर्वस्य दर्शने परमकुतूहलिनः आसन्। यदा तैः समुद्रतीरं प्राप्तं तदा तत्र उपस्थितः आसीत् अपूर्वः। पञ्च बालकाः अपि तं नमस्कृतवन्तः। "नमस्काराार्हः सः देवः, न तु अहम्। देव! सर्वम् अर्प्यते मया" इति वदन् आकाशं पश्यन् नमस्कृतवान् अपूर्वः।


पूर्वस्यां दिशि पूर्णचन्द्रः उदितः। आह्लादकरी चन्द्रिका सर्वत्र व्याप्ता। अपूर्वः क्षणकालं नेत्रे निमील्य गण्डमीनान् स्मृतवान्। अनन्तरक्षणे एव समुद्रजलम् आकाशे प्रेरयन्तः गण्डमीनाः आगच्छन्तः दृष्टाः। ते मीनाः तीरं प्राप्य विचित्रं ध्वनिम् उत्पाद्य 'प्रयाणार्थं सिद्धा वयम्' इति भावं प्रदर्शितवन्तः।

महतः गण्डमीनस्य उपरि अपूर्वः



उपविष्टवान्। तस्य सूचनायाः अनुगुणं समीरः अन्ये बालाः च एकैकं मीनम् आरुह्य उपविष्टवन्तः। तेषां रक्षणार्थं द्वादश अन्ये मीनाः उभयतः आगत्य स्थितवन्तः। अनन्तरं एतस्य गणस्य प्रयाणम् आरब्धम्।

अपूर्वः यं महागण्डमीनम् आरूढवान् अस्ति सः गणस्य अग्रे अस्ति। केचन काकाः एतस्य गणस्य अग्रे उड्डयमानाः मार्गदर्शनं कुर्वन्ति स्म। प्रशान्ते समुद्रे मन्दः वायुः वाति स्म। अतः प्रयाणम् अतीव आह्लादकरम् आसीत्। यदा चन्द्रः मध्याकाशम् आगतः तदा तैः राक्षससमूहसदृशाः शिलासमूहाः दृष्टाः। एषः प्रदेशः एव शिलाद्वीपः इति ज्ञातवान् अपूर्वः। गण्डमीनाः शिलानां समीपं गत्वा शिलाम् आलम्ब्य स्थितवन्तः। अपूर्वः



समीरादयः च मीनेभ्यः अवतीर्य शिलाद्वीपे पदानि स्थापितवन्तः।

शिलाद्वीपे शिलानां मध्ये तत्र तत्र गुहाः दृश्यन्ते स्म। एतादृश्यः गुहाः तत्र बह्व्यः आसन्। एतासु कस्यां निधिः स्यात् इति अन्वेषणं न तावत् सुकरम्। बालाः उत्साहेन गच्छन्तः एकैकशः गुहासु दृष्टिं पातितवन्तः। एवं दर्शनसमये कस्याञ्चित् गुहायां प्रकाशमानं किञ्चन वस्तु दृष्टं समीरेण। समीरः कुतूहलेन अवनम्य सर्पन् गुहां प्रविष्टवान्। तत्र फूत्कुर्वन्तः सर्पाः दृष्टाः तेन। सः भीत्याः झटिति प्रत्यागतवान्। अपूर्वस्य उपस्थितिं जानन्तः ते सर्पाः शान्ततया स्थितवन्तः।

"इदानीं शिलाद्वीपः अन्विष्टः। पुनः कदाचित् आगत्य निधेः अन्वेषणं करवाम वयम्" इति खिन्नं समीरं सान्त्वनवचनानि उक्तवान् कश्चन बालकः।

तावता कमपि विशेषं जानन् अपूर्वः मन्दस्वरेण– "हुष् ... सर्वे मौनं तिष्ठन्तु। शिलानां मध्ये निलीय तिष्ठाम वयम्" इति उक्तवान्। सर्वे विना शब्दं शिलानां मध्ये निलीय स्थितवन्तः।

शिलानाम् अन्यस्मिन् पार्श्वे कृतः कस्यचित् हासध्वनिः श्रुतः। अपूर्वः कर्णं प्रसार्य तत्र प्रचलत् सम्भाषणं सध्यानं श्रुतवान्।

"अहो! दशानां वर्षाणाम् अनन्तरम् इदानीम् अस्माकं स्वप्नः फलितः। निधिः दृष्टिगोचरः जातः। निधिप्राप्तौ ये विघ्नम् आचरन्ति स्म ते इदानीं परलोके कारागारे वा सन्ति। वयम् एव भाग्यशालिनः" इति हसन् उक्तवान् कश्चित्।

"अलं विलम्बाचरणेन। शीघ्रं निधिः नौकायां स्थापनीयः" इति सानुरोधम् आज्ञास्वरेण उक्तवान् अपरः।

"किं त्वरया? मम तु महती बुभुक्षा। अतः प्रथमं पूर्णोदरं भोजनम्। अनन्तरं च कार्यचिन्तनम्। अल्पः विलम्बः कृतः चेत् किम् अस्मद्वशीभूतः निधिः पक्षौ प्राप्य उड्डयनं कुर्यात्?" इति उच्चस्वरेण उक्तवान् अन्यः।

"प्रथमं निधिः समग्रः नौकायां



स्थापनीयः। अनन्तरं स्वेच्छया भोजनं पानं च प्रचलतु नाम। कार्यं तु प्रथमम्'' इति आज्ञास्वरेण उक्तवान् पूर्वतनः।

अपूर्वः शिलानां मध्यतः दृष्टिं प्रसारितवान्। अन्यस्मिन् पार्श्वे षट् दृढकायाः दृष्टाः तेन। समीपस्थायां गुहायां निधिपेटिकाः अपि तेन दृष्टाः। ते भीमकायाः चोराः ताः पेटिकाः एकैकशः नौकायां स्थापितवन्तः। अर्धघण्टाभ्यन्तरे एतत् कार्यं तैः समापितम्।


''कार्यं सम्पन्नम्। इतः परं भोजनं करवाम। पानोत्सवः अपि प्रचलतु नाम। यदि पूर्वम् एव भोजनं कृतं स्यात् तर्हि पेटिकानां नयनं क्लेशाय अभविष्यत्। इदानीं तु निश्चिन्तता'' इति उक्तवान् सः नायकः इव दृश्यमानः जनः।

''आम्। भवतः दूरदर्शिता योग्या एव'' इति उक्त्वा ते अनुयायिनः नौकातः महद्भिः पात्रैः आहारवस्तूनि पानीयकूपिकाः आनीय तीरे स्थापितवन्तः। विशालायाः शिलायाः उपरि मण्डलाकारेण उपविश्य ते सन्तोषेण खादन्तः, पिबन्तः, जल्पन्तः नृत्यम् अपि कृतवन्तः। तेषां स्वेच्छाचारस्य निरोद्धा कः अस्ति तस्मिन् निर्जनद्वीपे?

''निश्शब्दम् आगच्छन्तु। इतः पलायनार्थम् एषः एव सुसमयः। अमूल्यः निधिः चोरैः नौकायां स्थापितः अस्ति। चोराश्च सुरां पीत्वा मूर्च्छिताः सन्ति। यावत् ते सचेतनाः न भवन्ति ततः पूर्वम् एव अस्माभिः नौकाम् आरुह्य एतत् तीरं परित्यक्तव्यम्। विलम्बः मास्तु इदानीम्'' इति उक्त्वा तीरस्थायाः नौकायाः समीपं गतवान् अपूर्वः।

सर्वे बालाः उत्साहेन तम् अनुसृत्य नौकाम् आरूढवन्तः। तदा तत्र आगताः गण्डमीनाः मुखेन नौकां प्रेरितवन्तः। नौका ततः प्रस्थिता। केचन गण्डमीनाः नौकाम् आकृष्य अग्रे नीतवन्तः। पानमूर्च्छिताः चोराः अपूर्वादीनां नौकारोहणं तैः कृतं निधेः नयनं वा न ज्ञातवन्तः एव। —(अनुवर्तते)





# अपूर्वस्य साहसगाथा

## ९

(लुण्ठकानां बन्धनात् पञ्च बालकान् रक्षितवान् समीरः। अत्र अपूर्वः मार्गदर्शकः आसीत्। अनन्तरम् अपूर्वः, समीरः, पञ्च तत्स्नेहिताः च निधिप्राप्त्यर्थं नौकाम् आरुह्य शिलाद्वीपं गतवन्तः। तत्र सुरापानेन मूर्च्छां गताः आसन् लुण्ठकाः। अपूर्वसमीरादयः नौकायां स्थापितया सम्पत्त्या सह शिलाद्वीपतः प्रतिप्रस्थितवन्तः। तदनन्तरम्.....)

**नौ**कायाम् उपविष्टाः बालकाः तीरस्य समीपम् आगतवन्तः। 'समुद्रचोरान् राजाधीनान् कृत्वा राज्ञः प्रशंसां प्राप्य समीरः मित्रैः सह कस्यापि कार्यविशेषस्य निमित्तं कुत्रापि गतः' इति वार्ता सर्वत्र प्रसृता आसीत्। अतः बहवः ग्रामीणाः समुद्रतीरे एकत्रिताः आसन्।

'बालाः किमर्थं गताः स्युः?' इति सर्वे चिन्तयन्ति। एकैकः अपि स्वमत्यनुगुणम् एकैकं कारणं वदति। कश्चित् वदति– 'अपूर्वं स्थलं द्रष्टुं गतवन्तः स्युः ते' इति। अपरः वदति– 'कस्यचित् नौकानायकस्य मैत्रीं सम्पादितवन्तः स्युः ते। अतः समुद्रविहारार्थं गताः स्युः' इति। अन्यः वदति– 'तथा न स्यात्। किमपि अपूर्वं वस्तु अस्ति इति तैः श्रुतं दृष्टं वा स्यात्। अतः तस्य

समीरः अपूर्वं भक्त्या नमस्कृतवान्। अपूर्वस्य वियोगः आसन्नः इति तदीयं मनः खिन्नम् आसीत्। एतत् जानन् अपूर्वः उक्तवान्– "मित्र! धैर्येण तिष्ठतु। सर्वं मङ्गलमयं भविष्यति। ऐश्वर्यं प्राप्तम् इत्यतः सन्तोषे निमग्नः भवान् शिलाद्वीपस्थान् मूर्च्छितान् चोरान् मा विस्मरतु। तथैव परित्यक्ताः चेत् ते मरणं प्राप्नुयुः। राजानं निवेदयतु यत् ते रक्षणीयाः इति" इति।


एतावत् उक्त्वा नौकायाः पार्श्वे स्थितस्य गण्डमीनस्य उपरि उत्प्लुत्य उपविष्टवान् अपूर्वः। वेगेन गच्छन् गण्डमीनः अपूर्वं ततः दूरम् अनयत्। क्षणाभ्यन्तरे अपूर्वः अदृश्यतां गतः।


सागरनदीसङ्गमस्थले नौका आगता। तत्र तरङ्गाः न्यूनाः आसन्। जलं प्रशान्तम् आसीत्। दृढकायाः केचन ग्रामीणाः जले अवतीर्य बालान् तीरं प्रापितवन्तः।

समीरः राजानं विनयेन नमस्कृत्य कथम् एतत् ऐश्वर्यं प्राप्तम् इति विस्तरेण निवेदितवान्।

राजा नौकासमीपं गत्वा सर्वं परिशीलितवान्। तत्र महापेटिकासु अनर्घ्याणि आभरणानि सुवर्णमुद्राः च आसन्। एतत्सर्वं दृष्टवतः महाराजस्य महदाश्चर्यम् आनन्दश्च।

समीरस्य प्रार्थनाम् अङ्गीकुर्वन् राजा उक्तवान् यत् निर्धनानां जनानां साहाय्यार्थम् एव एतस्याः सम्पत्तेः उपयोगः क्रियते इति।





राजा एतदपि उक्तवान् यत् निर्धनानां साहाय्यं केन रूपेण कर्तुं शक्यः इति भवान् अपि सूचयतु इति।

"प्रभो, एषा सम्पत्तिः अत्रैव विश्रान्तिगृहे एव सुरक्षितं स्थापिता चेत् वरं भवेत्" इति सूचितवान् समीरः।

"अस्तु तावत्" इति अङ्गीकारं सूचितवान् राजा।

"अन्यदपि किञ्चित् निवेदनीयम् अस्ति प्रभो" इति उक्तवान् समीरः।

"किं तत्?" इति पृष्टवान् राजा।

"शिलाद्वीपे मूर्च्छावस्थायां स्थिताः लुण्ठाकाः अत्र आनेतव्याः" इति निवेदितवान् समीरः।

"ते तत्रैव परित्यक्ताः चेत् का हानिः? तेषां विषये अस्माभिः किमर्थं तावत् चिन्तनीयम्?" इति पृष्टवान् राजा।

"तथा कृतं चेत् ते तत्रैव मरणं प्राप्नुयुः। यद्यपि ते चोराः, तथापि तेषां तादृशं दुर्मरणं न उचितम्। प्रभो, भवान् तु दयालुः। तेषां विषये अल्पा दया प्रदर्शनीया भवता" इति उक्तवान् समीरः।

"ते अत्र आनीताः चेदपि तेषां मरणं तु निश्चितम् एव। तैः निरपराधिनः असङ्ख्याः जनाः मारिताः पीडिताः च। अनेके परिवाराः तैः उन्मूलिताः च। अतः तेषां मरणदण्डनम् एव उचितः दण्डः" इति उक्तवान् राजा। एतत् श्रुतवतः समीरस्य मुखं म्लानं जातम्।

राजा अपि एतत् लक्षितवान् एव। अपूर्वं निधिम् आनीतवन्तं समीरं खेदयितुं न इच्छति सः। अतः सः– "अस्तु तावत्। भवतः प्रार्थनां पुरस्कृत्य तान् अत्र आनेष्यामि। अनन्तरं यथायोग्यं दण्डनं चिन्तयिष्यामि" इति उक्त्वा अङ्गरक्षकान् आहूय राजधानीं प्रति वार्तां प्रेषितवान् यत् लुण्ठाकानाम् आनयनार्थं योग्या व्यवस्था करणीया इति।

राजाज्ञायाः अनुगुणं सम्पत्तिः विश्रान्तिभवने सुरक्षितं स्थापिता।

प्रातःकाले पञ्चाशत्सैनिकैः सहिते द्वे नौके प्रयाणार्थं सिद्धे जाते। मार्गं प्रदर्शयितुं समीरः तन्मित्राणि च लुण्ठाकतः या नौका वशीकृता तस्यां नौकायाम् उपविष्टवन्तः। समर्थाः

नाविकाः तां चालयन्तः आसन्। सैनिकानां नौकाद्वयं समीरनौकाम् अनुसृत्य शिलाद्वीपं प्रति अगच्छत्।

यदा तैः शिलाद्वीपः प्राप्तः तदा उषःकालः आसीत्। नौका कुत्र स्थगनीया इति सूचितवान् समीरः। यत्र नौकाः स्थिताः ततः अनतिदूरे एव राक्षसाकारकाः भीतिजनकाः महाशिलाः आसन्।

अकस्मात् कश्चन शिलाखण्डः वेगेन आगतः भटनायकस्य पार्श्वे अपतत्। ततः आत्मानं रक्षन् भटनायकः– "ते मूर्खाः अस्मान् सम्मुखीकुर्वन्तः सन्ति" इति वदन् शिलानां मध्ये तिष्ठन् पुनः उच्चस्वरेण चोरान् उद्दिश्य उक्तवान्– "भो भोः, भवन्तः यावत् प्रयत्नं कुर्वन्ति चेदपि भवतां बन्धनं तु भविष्यति एव। भवन्तः पञ्च एव सन्ति। वयं पञ्चाशत् स्मः। यदि भवन्तः स्वयम् आत्मसमर्पणं कुर्युः तर्हि दण्डे न्यूनता भवेत्। विरोधः आचरितः चेत् शूलारोपणं तु निश्चितम् एव" इति।

एतदनन्तरम् अपि लुण्ठाकाः वेगेन शिलाखण्डान् क्षिप्तवन्तः। शिलाखण्डप्रहारः क्षणे क्षणे प्रवृद्धः।

"हुँ... बाणप्रहारं कुर्वन्तु" इति आदिष्टवान् भटनायकः।

भटाः लुण्ठाकान् उद्दिश्य बाणवर्षणं कृतवन्तः। तदा तु शिलाखण्डक्षेपणं स्थगितम्। नौकास्थाः भटाः शिलाद्वीपं प्राप्तवन्तः।

भटनायकः समीरम् उक्तवान्– "भवान्,





भवतः मित्राणि च नौकायाम् एव तिष्ठन्तु। तेषां लुण्ठाकानां दृष्टिगोचराः मा भवन्तु। वयं तान् दुष्टान् गृहीत्वा आनेष्यामः'' इति।

अनन्तरं भटनायकः नौकातः अवतीर्णः। सः पुनरपि लुण्ठाकान् उद्दिश्य उक्तवान् यत् आत्मसमर्पणं करणीयम् इति। लुण्ठाकानां पक्षतः काऽपि प्रतिक्रिया न आगता।

भटाः उन्नताः शिलाः आरुह्य परितः दृष्टिं प्रसारितवन्तः। किन्तु तैः तस्मिन् द्वीपे कोऽपि न दृष्टः।

''ते भीरवः लुण्ठाकाः अस्मत्तः भीताः सन्तः कुत्रापि गुहायां लीनाः स्युः'' इति वदन् भटनायकः दश भटान् द्वीपरक्षणकार्ये नियोजितवान्। अवशिष्टान् भटान् लघुगणेषु विभज्य आदिष्टवान् यत् सर्वासु गुहासु अन्वेषणं करणीयम् इति।

समीरः तत्स्नेहिताः च नौकायाम् उपविश्य भटानां व्यवहारं कुतूहलेन पश्यन्तः आसन्।

''समीर!'' इति मृदुमधुरम् आह्वानं श्रुत्वा समीरः क्षणकालम् आश्चर्यचकितः। तस्यां दिशि दृष्टिं प्रसारितवान् सः।

''ते लुण्ठाकाः एतस्मिन् द्वीपे पूर्वस्यां दिशि गुहायां निलीय स्थिताः सन्ति। भवान् भटनायकम् एतम् अंशं सूचयित्वा अविलम्बेन तं तत्र नयतु'' इति उक्तवान् अपूर्वः।

समीरः महता उत्साहेन नौकातः अवतीर्य भटनायकस्य समीपं गतवान्।

''नौकायाम् एव तिष्ठतु इति खलु मया उक्तम्? अत्र आगमनम् अपायकरम्। अतः भवान् नौकायां तिष्ठतु'' इति उक्तवान् भटनायकः।

''भवतः वचनम् अङ्गीकृतं मया। किन्तु एकं विशेषविषयं सूचयितुम् अहम् अत्र आगतः। ते पञ्च लुण्ठाकाः पूर्वस्यां दिशि गुहायां निलीय स्थिताः सन्ति। अतः तान् ग्रहीतुं भटान् प्रेषयितुम् अर्हति भवान्'' इति सूचितवान् समीरः।

''एतत्सर्वं भवता कथं ज्ञातम्?'' इति आश्चर्येण पृष्टवान् भटनायकः।

'येन क्रमेण पूर्वं शिलाद्वीपः अन्विष्टः, येन



च क्रमेण सम्पत्तिः प्राप्ता, तेनैव क्रमेण एषा वार्ता अपि प्राप्ता" इति मन्दहासपूर्वकम् उक्तवान् समीरः।

"किं दिव्या शक्तिः काऽपि अस्ति वा भवतः, येन भवान् सर्वं क्षणमात्रेण ज्ञातुं शक्नुयात्?" इति पृष्टवान् भटनायकः।

"एतां जिज्ञासाम् अनन्तरं प्रदर्शयतु। प्रथमं लुण्ठाकानां ग्रहणं चिन्तनीयम्। मया सूचिते स्थले पश्यतु। अवश्यं ते तत्रैव सन्ति" इति उक्तवान् समीरः।

'समीरः सत्यम् एव वदन् अस्ति' इति अवगतवान् भटनायकः। अतः सः दश भटान् तस्याः गुहायाः समीपं प्रेषितवान्, या च समीरेण सूचिता।

स्वयम् अपि गुहायाः समीपं गत्वा पुनः उच्चस्वरेण उक्तवान् भटनायकः– "भोः, इदानीं वा आत्मसमर्पणं कुर्वन्तु। अन्यथा मरणं निश्चितं भवताम्" इति।


"मरणम्! केषां मरणम्? तत् तु कालः एव निश्चिनोति। भवत्सु कोऽपि गुहासमीपम् आगच्छति चेत् तस्य तु मरणं निश्चितम्। जागरूकाः भवन्तु" इति उच्चस्वरेण उक्तवान् लुण्ठाकनायकः।

अत्रान्तरे गुहायाः पृष्ठभागतः घोरः ध्वनिः श्रुतः– "अत्र गुहायां घोराः विषसर्पाः सन्ति। भवन्तः अत्र इतः परं क्षणकालं तिष्ठन्ति चेदपि ते सर्पाः भवतः दशन्ति। भवन्तश्च मरणं प्राप्नुवन्ति। हुँ, निर्गच्छन्तु इतः। अन्यथा घोराः सर्पाः फूत्कुर्वन्तः आगमिष्यन्ति। धावन्तु इतः" इति।

विषसर्पवार्तां, घोरम् अज्ञातध्वनिं च श्रुत्वा भीताः अभवन् लुण्ठाकाः। 'गुहायां कोऽपि घोरपिशाचः अस्ति इति भाति' इति चिन्तयन्तः ते कम्पमानाः गुहातः बहिः आगतवन्तः।

"वयम् आत्मसमर्पणं कुर्वन्तः स्मः" इति वदन् हस्तौ उन्नीय अग्रे आगतवान् लुण्ठाकनायकः। अन्ये लुण्ठाकाः अपि हस्तौ उन्नीय अग्रे आगतवन्तः। भटाः तान् सर्वान् बद्धवन्तः। –(अनुवर्तते)





आनयनार्थं ते गताः स्युः' इति। पुनः अन्यः वदति— 'अपूर्वस्य वस्तुनः आनयनार्थं न गताः ते। अल्पवयस्कानां बालानां तावत् सामर्थ्यं कथम्?' इति। इतरः वदति— 'बालानां सामर्थ्यम् अल्पम् इति मा चिन्तयतु भवान्। लुण्ठाकान् एव ते राजाधीनान् कृतवन्तः। अतः तेषाम् अपूर्वं सामर्थ्यम् अस्ति एव। यत्किमपि साधयितुं समर्थाः ते' इति।

आगच्छन्तीं नौकां दूरात् एव दृष्ट्वा जनाः उत्साहेन सन्तोषेण च उक्तवन्तः— "समीरः आगतः। तेन सह तन्मित्राणि अपि सन्ति" इति। एतां वार्तां सर्वत्र प्रसारयितुं केचन ग्रामं प्रति धावितवन्तः।


सागरतीरे एकं सुन्दरम् उपवनं, तत्र सुन्दरं भवनं च आसीत्। विश्रान्त्यर्थं राजा कदाचित् अत्र आगत्य तिष्ठति स्म। इदानीम् अपि राजा अत्र आसीत्। तेनापि श्रुतम् आसीत् यत् साहसशीलाः बालकाः समुद्रमार्गेण कुत्रापि गत्वा प्रत्यागच्छन्तः सन्ति इति। एतेषु बालकेषु, तत्रापि समीरे, राज्ञः विशेषप्रीतिः आसीत्। अतः सोऽपि तेषां दर्शने समुत्सुकः आसीत्।

राजा अश्वम् आरुह्य समुद्रतीरम् आगतवान्। तस्य पृष्ठतः रक्षकभटाः आसन्। बालकानां मातापितरः बन्धुगणाः च एतावता एव तीरे उपस्थिताः आसन्। एते सर्वे राजानं दृष्ट्वा आदरेण नमस्कृतवन्तः।

"एते बालकाः कस्य कार्यस्य निमित्तम् इतः गताः इति भवन्तः किमपि जानन्ति वा?" इति जनान् पृष्टवान् राजा।

"न जानीमः प्रभो।" इति सविनयम् उक्तवन्तः जनाः।

नौकायाम् उपविष्टः अपूर्वः ज्ञातवान् यत् तीरे ग्रामीणाः राजा च प्रतीक्षां कुर्वन्तः सन्ति इति। अतः सः समीरम् उक्तवान्— "मित्र! पुनः मिलामः। भवान् राजानं वदतु यत् एतस्याः सम्पत्तेः उपयोगः निर्धनानां प्रजानां हितार्थम् एव करणीयः इति। चोरेभ्यः वशीकृतायाः एतस्याः सम्पत्तेः स्वामी वस्तुतः कोऽपि नास्ति। अतः एतत् धनं कोषागारे न स्थापनीयम्। निर्धनानां हितार्थम् एव एतस्य उपयोगः भवेत्। तदा एव सार्थकता" इति।



# अपूर्वस्य साहसगाथा

## १०

(अपूर्वः समीरं तन्मित्राणि च समुद्रचोरेभ्यः रक्षितवान्। अनन्तरं ते सर्वे निधेः अन्वेषणार्थं शिलाद्वीपं गतवन्तः। तत्र अल्पेन एव श्रमेण ते निधिं प्राप्तवन्तः। निधिं राज्ञे अर्पयित्वा समीरः उक्तवान् यत् निर्धनानां साहाय्यार्थम् एव एतस्य उपयोगः करणीयः इति। चोराणां शूलारोपणम् अपि न करणीयम् इति निवेदितवान् समीरः। राजा एतत् अङ्गीकृतवान्। तदनन्तरम्.....)

समुद्रचोराणां विचारणा प्रवृत्ता। ते अपराधानुगुणं दण्डनं प्राप्तवन्तः। समुद्रचोराः अन्ये लुण्ठाकाः च कारागारे स्थापिताः इत्यतः राज्ये चोरभीतिः न्यूना जाता। 'अपूर्वशक्तिमान् दिव्यपुरुषः सज्जनान् सरलजनान् च रक्षति' इति वार्ता सर्वत्र प्रसृता। अतः दुष्टप्रवृत्तिमत्सु सहजतया भीतिः उत्पन्ना। अतः तादृशानां कुकृत्यानि अपि न्यूनानि जातानि। धनिकानां दर्पः अपि क्षीणः जातः। कारागारे ये स्थापिताः ते मनःपरिर्तनं प्राप्य सन्मार्गगामिनः जाताः। एतस्य सर्वस्य कारणं समीरः इति राज्ञः विश्वासः। अतः तं मार्गदर्शकत्वेन नियोजितवान् राजा। कालः तु सुखेन गच्छति स्म।

मया कृतं दिव्यानन्दमुनिं निवेद्य सन्तोषः जनयितव्यः इति आलोच्य अपूर्वः हिमालयपर्वतं गतवान्। तत्र दिव्यानन्दमुनिः



गुहायाम् उपविश्य ध्याने विलीनः आसीत्। गुहायाः बहिर्भागे उपविश्य स्वयं ध्याने निलीनः अभवत् अपूर्वः।

कदाचित् दिव्यानन्दमुनिः अपूर्वं स्वसमीपम् आहूय उक्तवान्– "वत्स! अपूर्व! इतः पूर्वं बहवः ऋषिमुनयः योगबलेन ध्यानबलेन च अपूर्वाः शक्तीः सम्पादितवन्तः। तादृश्यः शक्तयः इदानीम् एव भवति सन्ति। अतः भवता पुनः ध्यानादिना सम्पादनीयं किमपि नास्ति। किन्तु भवता एव करणीयानि बहूनि अन्यानि कार्याणि सन्ति लोके। तादृशानां कार्याणां साधनार्थं मया सम्पादितां शक्तिम् अपि भवते दास्यामि। एतद्बलेन भवान् करणीयं कार्यं यशस्वितया कर्तुं शक्ष्यति। मानवजातेः हितार्थं भवता बहुविधानि कार्याणि करणीयानि" इति।

"श्रीमन्! मया तादृशानि एव कार्याणि एतावत्पर्यन्तम् अपि कृतानि। एवं स्थिते अपि भवान् उपदिशन् अस्ति- लोकोपकारकाणि कार्याणि करणीयानि इति। एवं तर्हि मया अनुसृते मार्गे कोऽपि दोषः सञ्जातः वा?" इति विनयेन पृष्टवान् अपूर्वः।

"तथा किमपि नास्ति। भवता यानि कार्याणि कृतानि तानि सर्वाणि उचितानि एव। मम आशयं सम्यक् अवगत्य तदनुगुणं कार्यं कुर्वन् अस्ति। भवतः कार्यैः अहं नितरां सन्तृप्तः अस्मि। भवतः कार्येषु अल्पः अपि दोषः न घटितः" इति उक्तवान् दिव्यानन्दमुनिः।

"धन्योऽहं श्रीमन्, धन्योऽस्मि। इदानीं प्रायः सर्वेषु देशेषु राज्यभारनिर्वहणं न्याय्येन मार्गेण एव प्रचलति। कुत्रचित् अल्पाः समस्याः स्युः नाम। किन्तु ताः मानवैः स्वबुद्धिमत्तायाः साहाय्येन एव परिहर्तुं शक्याः। अतः तन्निमित्तं मया कोऽपि प्रयत्नः करणीयः नास्ति। एतादृशे सन्दर्भे अग्रे मया किं करणीयम् इति विषये मार्गदर्शनम् इच्छामि अहम्" इति उक्तवान् अपूर्वः।

"वत्स! देशेषु इदानीं महासमस्या काऽपि न दृश्यते इति तु सत्यम् एव। किन्तु मानवानां मतिः सदा समाना न भवति। अल्पे एव काले


तत्र विकृतयः उत्पद्यन्ते। तादृशे स्थले भवता कार्यं करणीयम् अस्ति एव" इति उक्तवान् दिव्यानन्दमुनिः।

"एवं तर्हि कस्मिंश्चित् देशे कस्यचित् मतौ विकृतिः उत्पन्ना अस्ति इति खलु भवतः आशयः? कुत्र तत्? विकृतमतिः कः सः?" इति कुतूहलेन पृष्टवान् अपूर्वः।

"वत्स! एतावत्पर्यन्तं भवता चोराः लुण्ठाकाः इत्यादयः गृहीताः, तेषां मनसः परिवर्तनार्थं प्रयत्नः कृतः च। वस्तुतः तु एते दुष्टकार्ये निरताः आसन्, तथापि एतेषां व्यवहारे स्पष्टता आसीत्। ते यत् कुर्वन्ति स्म तत् सर्वे ज्ञातुं शक्नुवन्ति स्म। किन्तु लोके सर्वे एवं न भवन्ति। केचन तु एवं भवन्ति यत् ते गौरवार्हे पदे तिष्ठन्तः अपि स्वार्थादिसम्पादनार्थं गूढतया दुष्टकार्याणि चिन्तयन्ति। धनबलात् दर्पात् वा कार्यं साधयितुं प्रयतन्ते ते। किन्तु एतादृशैः यत् क्रियते तेन समाजस्य महत् अहितं सिध्यति। एतादृशानां कुकार्याणि झटिति दृष्टिगोचराणि न भवन्ति। एषः एव क्लेशः" इति सखेदम् उक्तवान् दिव्यानन्दमुनिः।


"श्रीमन्! एतादृशं कुकृत्यं कुत्र प्रचलति? तस्य पृष्ठभूमिकायां स्थितः दुष्टः सः कः? तेन किं क्रियमाणम् अस्ति?" इति उद्वेगेन पृष्टवान् अपूर्वः।

"तत्सर्वं भवता अन्वेष्टव्यम्। कदाचित् अहं मानवकुलस्य हितं चिन्तयन्



ध्याननिमग्नः आसम्। तदा मया दिव्यदृष्ट्या द्वौ दुष्टौ दृष्टौ। तौ अपवित्रं किञ्चन कार्यं चिन्तयन्तौ स्तः इति एतावत् मया ज्ञातम्। तयोः अन्यतरम् अहं जानामि। सः रुद्रपुर्याः प्रधानमन्त्री। श्वः रात्रौ तौ पुनरपि मिलित्वा समालोचनं कुरुतः इति अपि ज्ञातं मया। किन्तु तयोः उद्देशः कः, कः मार्गः अनुस्रियते इत्यादिकम् अहं न जानामि। भवान् रुद्रपुरीं गत्वा परिस्थितिं समालोच्य दुष्टमन्त्रिणः कुतन्त्रं विफलीकरोतु" इति उक्तवान् मुनिः दिव्यानन्दः। अनन्तरम् अन्यस्य मनसः ज्ञाने उपकारिकां विद्याम् अपूर्वम् उपदिश्य आशिषा अनुगृह्य तं ततः प्रेषितवान्।

* * * *



राजभवनस्य पुरतः महान् सम्भ्रमः उत्साहः च। राजोद्योगिनः परस्परं कार्यम् आदिशन्तः वेगेन इतस्ततः सञ्चरन्ति। जनाः अपि महता उत्साहेन सन्ति।

राजधानीम् ऐदम्प्राथम्येन आगतः कश्चित् अन्यं पृष्टवान्– "किं प्रवर्तते अत्र? कः विशेषः?" इति।

"अस्माकं राजकुमारी कृष्णकुमारी मातुलस्य जयवर्मणः गृहात् लावण्यपुरात् प्रत्यागच्छन्ती अस्ति। षड्भ्यः मासेभ्यः पूर्वं सा इतः गतवती आसीत्। तस्याः स्वागतार्थम् एवं जनाः सम्मिलिताः सन्ति" इति उक्तवान् कश्चन राजोद्योगी।

पुनः अल्पे एव काले गजस्य उपरि स्थापिते सुमनोहरतया अलङ्कृते वरण्डके उपविष्टा राजकुमारी कृष्णकुमारी राजभवनसमीपम् आगतवती। तस्याः उपरि सुवर्णच्छत्रं राजते स्म। तस्याः पुरतः पृष्ठतः च अन्यगजयोः उपरि सहचर्यः उपविष्टवत्यः आसन्। गजम् उभयतः रक्षकभटाः गच्छन्तः आसन्।

गजस्य उपरि उपविष्टाः सहचर्यः प्रथमं गजात् अवतीर्य राजकुमार्याः समीपं गतवत्यः। भटाः सम्भ्रमेण आगत्य गजस्य पार्श्वे उन्नतं मृदुलम् आसनं स्थापितवन्तः। हस्तिपकस्य सूचनायाः अनुगुणं राजकुमारी किञ्चित् अवनम्य मृदुलासनस्य उपरि पदं स्थापितवती। ततः भूमिं प्राप्तवती। भूमौ अपि मृदुलाः वस्त्रकटाः प्रसारिताः आसन्।

"आगच्छतु वत्से!" इति उक्त्वा तां प्रीत्या आलिङ्ग्य हस्तं गृहीत्वा अग्रे प्रस्थितवान् विश्ववर्मा।

रुद्रपुर्याः राज्ञः विश्ववर्मणः एकमात्रपुत्री कृष्णकुमारी। बाल्ये एव तया मातृवियोगः प्राप्तः आसीत्। राजा विश्ववर्मा अन्यस्याः विवाहे उत्साहं न प्रदर्शितवान् आसीत्। रुद्रपुर्याः प्रतिवेशिराज्यं लावण्यपुरम्। तस्य राजा च जयवर्मा। सः कृष्णकुमार्याः मातुलः। अनपत्यः सः कृष्णकुमारीम् एव पुत्रीं-भावयति स्म। भगिन्याः मरणस्य अनन्तरं तु भगिनीपुत्र्यां कृष्णकुमार्यां विशेषप्रीतिः जयवर्मणः। स्वराज्यं कृष्णकुमार्यै एव दातुं सङ्कल्पितवान् आसीत् जयवर्मा। एवं

राज्यद्वयस्य उत्तराधिकारिणी आसीत् कृष्णकुमारी। पितुः मातुलस्य च सन्तोषार्थं सा षण्मासान् एकैकत्र वसति स्म। अतः प्रतिषण्मासे एकवारं रुद्रपुर्यां लावण्यपुरे च राजकुमार्याः स्वागतनिमित्तम् उत्सवः आचर्यते स्म।

युवराज्ञ्याः कण्ठे सुवर्णहाराणां मध्ये कश्चन विशिष्टः मणिहारः सुशोभते स्म। अपूर्वम् एतं हारं दृष्ट्वा आश्चर्येण पुत्रीं पृष्टवान् विश्ववर्मा– "कुतः एतत्?" इति।


"अपूर्वः एषः मणिहारः मातुलेन मम निमित्तं कारितः" इति साभिमानम् उक्तवती युवराज्ञी।

मणिहारं हस्तेन स्पृष्ट्वा पुनः पुनः परीक्ष्य– "पूर्वं केनापि महात्मना अतुलशक्तिशाली चन्द्रकान्तमणिः दत्तः इति मया श्रुतम् आसीत्। सः एव मणिः एषः न स्यात् खलु?" इति पृष्टवान् राजा।

"भवता उक्तः मणिः एषः एव। बहोः कालतः एषः मणिः धनागारे एव आसीत्। उभयोः देशयोः शान्तिसौभाग्यार्थं समृद्ध्यर्थं च मातुलः तं मणिं हारे नियोज्य मह्यं दत्तवान्। मातुलस्य प्रीतेः द्योतकः एषः हारः कथम् अस्ति?" इति पृष्टवती कृष्णकुमारी।

"नितरां शोभते। रत्नं रत्नेन सङ्गतम् अस्ति" इति प्रीत्यतिशयेन पुत्रीम् उक्तवान् विश्ववर्मा।


* * * *



"एतावत्पर्यन्तं कुत्रापि कोणे सुप्ता सौभाग्यलक्ष्मीः इदानीं भवतः समीपे आगता अस्ति। इतः परं पाणिग्रहणमात्रम् अवशिष्टम्" इति उक्तवान् मान्त्रिकः– पुरतः स्थितं प्रधानमन्त्रिणं पश्यन्।

प्रधानमन्त्री एतत् अङ्गीकुर्वन् सन्तोषेण मन्दहासपूर्वकं शिरः चालितवान्।

"किन्तु भवता एतत् तु अवश्यं ज्ञातव्यं यत् एषा अदृष्टलक्ष्मीः भवत्समीपं स्वयं न आगता इति। तस्याः जागरणार्थं मया उपायः आश्रितः। मन्त्रबलस्य प्रयोगः कृतः। अतः एव राज्ञः जयवर्मणः हृदये परिवर्तनम् आगतम्। चिरकालात् धनागारे स्थापितं चन्द्रकान्तमणिं हारे संयोज्य पुत्र्याः कण्ठे



पिधाय हासं निगृह्य मौनम् आश्रितवान्।

"किमर्थं श्रीमन्! किम् अभवत्?" इति आश्चर्येण पृष्टवान् प्रधानमन्त्री।

"इदानीं किमपि न जातम्। किन्तु कदाचित् भित्तयः अपि कर्णवत्यः भवन्ति खलु? अतः जागरूकता आश्रयणीया" इति मन्दस्वरेण उक्तवान् मान्त्रिकः।

'अहो दुष्टता! मानवानां मनस्सु कीदृशाः विकाराः जायन्ते इति कोऽपि न जानाति इति गुरुणा यत् उक्तं तत् युक्तम् एव। गुरुणा या अन्यमनोज्ञानसाहाय्यिका शक्तिः दत्ता सा तु महते उपयोगाय अभवत्। एतयोः चिन्तनम् आमूलाग्रं ज्ञात्वा योजनां विफलीकरिष्यामि' इति स्वगतम् उक्तवान् अपूर्वः।

मान्त्रिकः प्रधानमन्त्री च सुदीर्घकालं यावत् गभीरं समालोचनं कृतवन्तौ। स्वशक्त्यतिशयेन तयोः चिन्तनं समग्रं ज्ञातवान् अपूर्वः।

मान्त्रिकः प्रधानमन्त्री च अभिन्ने गुरुकुले पठितवन्तौ आस्ताम्। तयोः गुरोः गुरुः अपूर्वं चन्द्रकान्तमणिं जयवर्मणः पूर्वजेभ्यः दत्तवान् आसीत्। जयवर्मवंशीयाः तं मणिं धनागारे सुरक्षितं स्थापितवन्तः आसन्। गुरुमुखात् मणेः विषयः ताभ्यां ज्ञातः आसीत्।


कदाचित् मान्त्रिकः तालग्रन्थं पठन् तत्र उल्लिखितं चन्द्रकान्तमणिरहस्यं ज्ञातवान् आसीत्। 'चन्द्रकान्तमणिं धृत्वा यः विशिष्टक्रमेण पूजां करोति सः चक्रवर्ती

स्थापितवान् सः" इति साभिमानम् उक्त्वा अङ्गुलीभिः श्मश्रु स्पृष्टवान् मान्त्रिकः।

"भवतः सामर्थ्यम् अपूर्वम् एव। अतः कार्यसिद्धौ सन्देहः एव नास्ति मम" इति उक्तवान् प्रधानमन्त्री।

"अहो दौर्भाग्यम्! चोरः गुरुः चण्डालः शिष्यः!" इति निलीय स्थितः अपूर्वः स्वगतम् उक्तवान्।

"जयवर्मा विश्ववर्मा वा चन्द्रकान्तमणेः महत्त्वं न जानीतः यत् तत् तु अस्माकं महत् सौभाग्यम्। अमूल्यः मणिः इति एतावत् एव जानीतः तौ। मणेः अन्यानि वैशिष्ट्यानि तौ सर्वथा न जानीतः। मूर्खौ तौ!" इति उक्त्वा उच्चैः हसितुम् उद्युक्तः मान्त्रिकः बलात् मुखं



भविष्यति' इति तत्र उल्लिखितम् आसीत्। एतत् ज्ञात्वा सन्तुष्टः मान्त्रिकः केनापि उपायेन मणेः वशीकरणं करणीयम् इति सङ्कल्पितवान्। अतः सः जयवर्मणः समीपं गत्वा मधुरैः वचनैः तं वशीकृत्य ध्यानजपादिकम् अभिनीय कोषागारस्थः मणिः मया मन्त्रबलेन ज्ञातः इति उक्त्वा राजानम् उक्तवान्– ''युवराज्ञी कृष्णकुमारी दुष्टशक्त्या आविष्टा अस्ति। अतः चन्द्रकान्तमणियुक्तः हारः तया धरणीयः। तदा राज्यस्य अपि हितम्'' इति।


भागिनेय्याः हितम् इच्छन् जयवर्मा अचिरात् एव चन्द्रकान्तमणियुक्तं हारं कारयित्वा कृष्णकुमार्यै दत्तवान्। 'मातुलः प्रीत्या एतं हारं मह्यं दत्तवान्' इति चिन्तितवती कृष्णकुमारी।

'मया मन्त्रप्रयोगबलतः जयवर्मणः मनसि परिवर्तनम् आनीतम्। अतः एव राजा तन्मणियुक्तं हारं कृष्णकुमार्यै दातुं सिद्धः जातः' इति मिथ्यावचनम् उक्तवान् मान्त्रिकः। मन्त्री अत्र विश्वसितवान्। 'मन्त्रज्ञस्य एतस्य मान्त्रिकस्य साहाय्येन अहं चक्रवर्ती भविष्यामि' इति चिन्तयन् अस्ति प्रधानमन्त्री।

'पूजाव्याजेन चन्द्रकान्तमणिं हस्ते स्वीकृत्य उपायेन स्वायत्तीकरणीयम्' इति योजनां कृतवान् अस्ति मान्त्रिकः। मान्त्रिकस्य कुतन्त्रं सर्वथा न जानाति प्रधानमन्त्री। 'महाविरक्ते मान्त्रिके लोभः नास्ति' इति चिन्तयति सः।

दर्शनमात्रेण कस्य स्वभावः कीदृशः इति ज्ञातुं सामर्थ्यम् अस्ति अपूर्वस्य। प्रधानमन्त्री स्वभावेन मूर्खः, न तु मान्त्रिकवत् दुष्टः। किन्तु मूर्खताकारणतः सः तादृशान् अपि आदरेण पश्यति स्म, ये च दुष्टाः सन्तः अपि साहाय्यं कुर्वन्ति। 'एतादृशः अविवेकी यदि चक्रवर्ती भवेत् तर्हि लोकस्य स्थितिः शोचनीया स्यात्। अतः एव मम गुरुः एतस्य निग्रहणार्थं मां नियोजितवान् अस्ति' इति आलोचितवान् अपूर्वः। – (अनुवर्तते)





# अपूर्वस्य साहसगाथा

## ११

(दिव्यानन्दमुनेः आदेशस्य अनुगुणं दुष्टानां निग्रहणार्थम् अपूर्वः हिमालयतः रुद्रपुरम् आगतवान्। युवराज्ञ्याः कृष्णकुमार्याः कण्ठे स्थितस्य हारस्य मध्ये स्थितं महिमान्वितं चन्द्रकान्तमणिम् अपहर्तुम् इच्छन् दुष्टः मान्त्रिकः मुख्यमन्त्रिणा सह समालोचनं कुर्वन् आसीत्। अपूर्वः रहसि निलीय स्थित्वा तयोः सम्भाषणम् आद्यन्तं श्रुतवान्। अतः मान्त्रिकस्य दुष्टविचाराः अपूर्वेण सम्यक् ज्ञाताः। तदनन्तरम्.....)

महादुष्टः मान्त्रिकः यदा मुख्यमन्त्रिणः रहस्यप्रकोष्ठात् बहिः आगतवान् तदा मध्यरात्रः अतीतः आसीत्। मान्त्रिकः कृष्णवर्णीयं वस्त्रं धृतवान् आसीत्। तस्य दीर्घाः केशाः श्मश्रु चापि कृष्णवर्णीयाः आसन्। अतः अन्धकारे तस्य अभिज्ञानं कष्टकरम् आसीत्। अपूर्वः विना शब्दं मान्त्रिकम् अनुसरन् अस्ति। कश्चित् अनुसरन् अस्ति इति तु मान्त्रिकः न जानाति।

मान्त्रिकः चन्द्रकान्तमणिं स्वीकृत्य कीदृशीं पूजां करिष्यति? पूजां कः कारयति? पूजास्थलं कुत्र स्यात्? इत्येतादृशान् अंशान् ज्ञातुम् इच्छन् अपूर्वः मान्त्रिकम् अनुसृतवान् अस्ति। पादध्वनिः यथा अन्येन न श्रुयेत तथा विशेषजागरूकताम् आश्रितवान् अस्ति अपूर्वः। मान्त्रिकस्य दृष्टिः श्रवणशक्तिः च



यद्यपि तीक्ष्णा, तथापि सः अपि अपूर्वेण क्रियमाणम् अनुसरणं न ज्ञातवान्।

नगरसीमायाः अतिक्रमणस्य अनन्तरं मार्गस्य पार्श्वे स्थितात् गुल्मतः कश्चन विशालकायः भल्लूकः आगत्य मान्त्रिकस्य पुरतः विनयेन अतिष्ठत्। मान्त्रिकः तस्य उपरि उपविश्य बलात् तस्य कर्णलुण्ठनं कृतवान्। तदा भल्लूकः महता वेगेन अरण्यम् अभिलक्ष्य अधावत्।

वेगेन गमनं तु अपूर्वेण अपि ज्ञातम् एव खलु? अतः सः अपि धावन् भल्लूकम् अनुसृतवान्।

अल्पे एव काले तैः लघुनद्याः तीरं प्राप्तम्। मान्त्रिकः भल्लूकात् अवतीर्य कोपेन भल्लूकस्य कर्णलुण्ठनं कृत्वा— "अये, एषु दिनेषु अलसः जातः अस्ति भवान्। धावने वेगः न्यूनः दृश्यते। गच्छतु तावत् इदानीम्। वेतालवटवृक्षस्य समीपे तिष्ठन् मम प्रतीक्षां करोतु। अचिरात् एव अहं तत्र आगमिष्यामि" इति उक्तवान्।

भल्लूकः लघुगर्जनेन अङ्गीकारं संसूच्य ततः निर्गत्य अन्धकारे निलीनः अभवत्। भल्लूकस्य स्थितिं दृष्ट्वा खिन्नः अपूर्वः। यतः तेनापि प्राणिनां द्वारा कार्याणि कार्यन्ते। किन्तु कदापि एवं निर्दयं व्यवहारः तु न क्रियते। प्रीत्या आदरेण दृश्यन्ते ते। अतः एव ते प्राणिनः अपि अपूर्वेण सह प्रीत्या आदरेण च व्यवहरन्ति। 'एषः मान्त्रिकः मन्त्रबलात् एतान् प्राणिनः वशीकृतवान् अस्ति। दर्पेण नैष्ठुर्येण च एतेषां द्वारा कार्यं कारयति' इति आलोचितवान् अपूर्वः।

नदीतीरं प्राप्य मान्त्रिकः कमपि मन्त्रं जपितवान्। मन्त्रजपस्य अनन्तरं त्रिवारं करताडनं कृतवान्। तावता नदीजलं द्विधाः विभज्य तरन् कश्चन मकरः मान्त्रिकस्य समीपम् आगच्छत्। मान्त्रिकस्य पुरतः विनयेन अतिष्ठत् च।

मान्त्रिकः मकरस्य उपरि उपविश्य आज्ञापितवान्— "अये, त्वरया गच्छतु रे" इति।

मकरः पश्चिमदिशि वायुवेगेन तरन् बाणः इव वेगेन अगच्छत्। अपूर्वः अपि तम्


RAZI



एव अनुसरन् तीरे एव अधावत्।

आकाशे चन्द्रः रेखामात्रं दृश्यते स्म। तत्र तत्र नक्षत्राणि विराजन्ते। नदीम् उभयतः गुल्माः वृक्षाः च प्रवृद्धाः सन्ति। तदा तदा शृगालरवः श्रूयते स्म। उलूकानाम् घूङ्कारः अपि श्रूयते तदा तदा। व्याघ्रगर्जनम् अपि श्रूयते कदाचित्। किन्तु अपूर्वः भीतिं नाम्ना अपि न जानाति खलु? अतः सः तीरे वेगेन धावन् मान्त्रिकम् अनुसृतवान्।

एवं बहुदूरं गमनानन्तरं नदी द्विधा विभक्ता अभवत्। नद्याः अन्यतरा शाखा नितरां कृशा दुर्गमा च। अग्रे गता सा नदीशाखा उन्नतपर्वतयोः मध्ये प्रवहति। अत्र तु नदीशाखायाः गभीरता अत्यधिका।

दुर्गमेन नदीमार्गेण गच्छन् मकरः सुरङ्गमयं मार्गं प्राविशत्। अनन्यगतिकः अपूर्वः अपि नद्याम् अवतीर्य तरन् सुरङ्गमार्गं प्रविष्टवान्। वेगेन तरन् अपि अपूर्वः अल्पं शब्दम् अपि न करोति।

मकरः सुरङ्गमुखप्रदेशे अतिष्ठत्। मान्त्रिकः मकरात् उत्प्लुत्य तीरस्थायाः शिलायाः उपरि अतिष्ठत्।

"कः तत्र?" इति तीक्ष्णः कठोरः च कण्ठध्वनिः गुहातः निर्गतः।

एतादृशः विचित्रः कण्ठस्वरः अपूर्वेण इतः पूर्वं न श्रुतः आसीत्। स च स्वरः कस्याश्चित् वृद्धायाः इव भासते स्म। 'दुर्गमे अस्मिन् प्रदेशे वृद्धायाः स्वरः कथम्?' इति आश्चर्यम् अनुभूतवान् अपूर्वः।

"भवत्याः पादसेवकः वीरविकटः अस्मि। अन्तः आगच्छामि वा अहम्?" इति अपृच्छत् मान्त्रिकः।

"भवतः आगमनं तु ज्ञातम्। भवन्तम् अनुसृत्य आगतः सः अपरः कः? भवता सह सः किमर्थम् आगतः?" इति तर्जनस्वरेण पृष्टवती वृद्धा।

"मां मम वाहनं मकरं च विना अन्यः कोऽपि जीवी नास्ति अत्र अम्ब!" इति उक्तवान् मान्त्रिकः।

"मूर्ख! परितः दृष्ट्वा वदतु। कोऽपि भवन्तम् अनुसृत्य आगतः इव दृश्यते खलु?" इति उक्तवती वृद्धा।

'गुहास्था वृद्धा मम आगमनम् अपि ज्ञातुं समर्था तीक्ष्णमतिः' इति आलोच्य अपूर्वः गुरुणा उपदिष्टस्य अदृश्यकारकस्य मन्त्रस्य साहाय्येन अदृश्यतां गतवान्।

मान्त्रिकः परिवृत्य यदा सर्वत्र दृष्टवान् तदा कोऽपि न दृष्टः तेन।

"अम्ब! कोऽपि नास्ति अत्र। मां मकरं च विना अन्यः कोऽपि जीवी न दृश्यते" इति उक्तवान् मान्त्रिकः।

"अलं व्यर्थचर्चया। अन्तः आगच्छतु तावत्" इति आज्ञास्वरेण उक्तवती वृद्धा।

मान्त्रिकः वीरविकटः गुहायाः अन्तः गतवान्। अपूर्वः मन्दम् अपरां शिलाम् आरुह्य शिलानां मध्ये गच्छन् गुहां प्रविष्टवान्।

वृद्धा मानवकपाले स्थिते अग्नौ विशिष्टं चूर्णं पातयन्ती पीतकान्तियुक्तम् अग्निं वर्धयन्ती भित्तिम् आलम्ब्य पादौ प्रसार्य उपविष्टवती आसीत्।

तस्याः वृद्धायाः वयः कियत् इति निश्चयेन वक्तुं न शक्यते। तथापि तया त्रिशताधिकाः वसन्ताः दृष्टाः इत्यत्र तु नास्ति सन्देहः। तस्याः शरीरे चर्म अस्थिपञ्जरं च दृश्यते, नान्यत् किमपि। तस्याः चर्म वलयितम् आसीत्। तथापि शरीरे विशिष्टा कान्तिः दृश्यते स्म। तस्याः भीतिजनके नेत्रे सुविशाले रक्ते घोरे च। अङ्गुलीषु दीर्घाः नखाः दृश्यन्ते स्म। अतः तस्याः हस्तौ पादौ च




सर्पभ्रमं जनयन्ति स्म।

"का वार्ता? भवतः प्रयत्नः फलितः वा?" इति पृष्टवती मन्त्रवादिनी वृद्धा।

मान्त्रिकः वीरविकटः तां साष्टाङ्गं नमस्कृत्य— "अम्ब! इष्टं फलितम् इव। स च विशिष्टः मणिः इदानीं राजकुमार्याः कण्ठे अस्ति। अचिरात् एव मम हस्तगतः भविष्यति च" इति निवेदितवान्।

"एकः एव मणिः भवतः हस्तगतः भविष्यति, उत...." इति कटाक्षेण वीरविकटं पश्यन्ती पृष्टवती मन्त्रवादिनी वृद्धा।

किम् उत्तरं वक्तव्यम् इति अजानन् वीरविकटः मौनम् आश्रितवान्। तस्य अवस्थां दृष्ट्वा वृद्धा विकटाट्टहासेन गुहां



प्रतिध्वनितां कृतवती।

"भवत्याः आशयः मया सम्यक् न ज्ञातः। चन्द्रकान्तमणिना सह मया अन्यः कोऽपि मणिः आनेतव्यः आसीत् वा?" इति पृष्टवान् वीरविकटः।

"अथ किम्? चन्द्रकान्तमणिः भवतः दृष्ट्या मूल्यवान् स्यात् नाम। किन्तु तावन्मात्रस्य आनयनेन किं प्रयोजनम्?" इति उक्तवती मन्त्रवादिनी वृद्धा।

"अम्ब! प्रयोजनं किमर्थं न स्यात्? मणिः आनीतः चेत् भवन्तं चक्रवर्तिनं करिष्यामि इति भवत्या एव खलु उक्तम्? चक्रवर्तित्वप्राप्तिः किं प्रयोजनं न?" इति पृष्टवान् मान्त्रिकः।

"तत् तु प्रयोजनं भवता प्राप्यते। तेन मम किमपि प्रयोजनं नास्ति खलु? मम प्रयोजनम् अपि भवता चिन्तनीयं खलु?" इति उक्तवती मन्त्रवादिनी।

"अम्ब! त्रिशतं वर्षाणि यावत् भवती सार्थकं जीवनं यापितवती। अतः इतः परं भवत्याः जीवने का आशा स्यात्? परोपकारः एव भवत्याः प्रयोजनम् इति अहं भावयामि" इति उक्तवान् मान्त्रिकः वीरविकटः।

"हुँ, परोपकारः! तादृशाः शब्दाः मम जीवने निरर्थकाः! भवान् किमपि महत् कार्यं साधयितुम् इच्छति। अहम् अपि तादृशम् एव महत् कार्यं साधयितुम् इच्छामि। किन्तु तस्य साधने मार्गं जानती अपि अहं शरीरेण असमर्था। वार्धक्येन जर्झरितम् अस्ति मदीयं शरीरम्। अतः मम इष्टस्य साधनार्थं भवतः साहाय्यम् इच्छन्ती अहं भवतः कार्ये साहाय्यं कुर्वती अस्मि। स्वकार्यस्य सिद्धेः अनन्तरम् अपि भवान् मया कृतम् उपकारं स्मरेत् इति भावयामि अहम्" इति उक्तवती मन्त्रवादिनी।

"अम्ब! भवत्याः उपकारं विस्मरेयं वा अहम्? आजीवनं भवत्याः उपकारं स्मरामि एव" इति विनयातिशयं प्रदर्शयन् उक्तवान् मान्त्रिकः।

"एतादृशेन उपचारवचनेन अलम्। मया यादृशः उपकारः क्रियते तादृशः एव प्रत्युपकारः अपि इष्यते। स्मरतु एतत्" इति उक्तवती मन्त्रवादिनी।

"भवती कीदृशं प्रतिफलम् इच्छति? स्पष्टं

वदतु तावत्'' इति उक्तवान् मान्त्रिकः वीरविकटः।

''मम तु एका एव आकांक्षा– गतं यौवनं कथमपि पुनः प्राप्तव्यम् इति। अतः भवता चन्द्रकान्तमणिना सह युवराज्ञी अपि आनेतव्या। सा मम पादयोः पुरतः पातनीया। तस्याः यौवनं चूषामि अहम्। मम एताः त्रिशतवर्षीयाः दंष्ट्राः तस्याः शरीरे स्थितं समग्रं सारं चूषन्ति'' इति उक्त्वा विकटाट्टहासं कृतवती मन्त्रवादिनी।

तस्याः विचित्रां घोराम् अपेक्षां श्रुतवतः अपूर्वस्य शरीरे कम्पनम् उत्पन्नम्। 'एषा वृद्धा न सामान्या। भयजनिका अस्ति एतस्याः अपेक्षा' इति आलोचितवान् सः।

''अम्ब! इतः पूर्वं भवत्या वह्वीनां युवतीनां रक्तं चूषितम्। तथापि भवत्या यौवनं तु न प्राप्तम्। अतः राजकुमार्याः शरीरसारस्य चूषणेन किं प्रयोजनम्?'' इति पृष्टवान् वीरविकटः।

''निराशादायकानि वचनानि मा वदतु। पूर्वतनप्रयत्नाः विफलाः यत् तत्र अन्यत् एव कारणम् अस्ति। पूर्वम् आनीताः युवत्यः राजभोगेन वर्धिताः न आसन्। एतस्मिन् सन्दर्भे मम यत्नः फलेत् एव इति मम दृढः विश्वासः। रुद्रपुर्याः राजकुमार्यां कृष्णकुमार्यां मया अपेक्षिताः गुणाः सन्ति। अतः तस्याः शरीरस्थं यौवनं चूषित्वा अहं यौवनं प्राप्य लोकैकसुन्दरी भविष्यामि। सर्वान् भोगान् अनुभविष्यामि'' इति सोन्मादम् उक्तवती मन्त्रवादिनी।

''भवती इदानीम् अपि सुन्दरी एव अस्ति'' इति उक्तवान् वीरविकटः।

''अये। एतादृशानि मुखस्तुतिवचनानि मह्यं न रोचन्ते। एतादृशेन व्यवहारेण मां वशीकर्तुं न अर्हति भवान्। यत् मया इष्टं तत् करोतु प्रथमम्। तेन अहं सन्तुष्टा भवामि, न तु एतादृश्या मुखस्तुत्या। अतः प्रथमं कार्ये उद्युक्तः भवतु। गच्छतु तावत् कार्यसाधनाय'' इति उक्तवती मन्त्रवादिनी।

–(अनुवर्तते)





# अपूर्वस्य साहसगाथा


## १२

(रुद्रपुर्याः प्रधानमन्त्री, दुष्टः मान्त्रिकः वीरविकटश्च युवराज्ञ्याः कण्ठे स्थितं चन्द्रकान्तमणिम् अपहर्तुम् कपटोपायं रचितवन्तौ। वीरविकटः स्वगुरोः मन्त्रवादिन्याः समीपं गत्वा सर्वं निवेदितवान्। 'युवराज्ञी आनीय मम पादयोः पुरतः पातनीया' इति आज्ञापितवती मन्त्रवादिनी। त्रिशताधिकवर्षीया सा पुनर्यौवनं प्राप्तुम् इच्छति स्म। एताः सर्वाः घटनाः ज्ञाताः अपूर्वेण। तदनन्तरम्.....)

एतस्मिन् वर्षे काले वृष्टिः जाता अस्ति इत्यतः रुद्रपुर्याः जनाः सन्तुष्टाः सन्ति। सामान्यानां कृषिकाणां मुखे अपि मन्दहासः तृप्तिः च विलसति।

'समृद्धियुक्ते एतस्मिन् वर्षे युवराज्ञ्याः जन्मदिनोत्सवः सवैभवम् आचरणीयः' इति प्रजानाम् इच्छा। 'विविधाः कार्यक्रमाः आयोजनीयाः, महोत्सवः आचरणीयः' इति विश्वकर्ममहाराजस्य अपि इच्छा।

एतां वार्तां श्रुतवतः दुष्टमन्त्रिणः महान् सन्तोषः। सः महता उत्साहेन विश्वकर्मराजस्य समीपं गत्वा उक्तवान्– "महाप्रभो, युवराज्ञ्याः जन्मदिनोत्सवः आसन्नः अस्ति। एतस्मिन् वर्षे स च उत्सवः महता वैभवेन करणीयः इति प्रजाः इच्छन्ति। ममापि आशयः तथैव। महता वैभवेन



करणीयं चेत् महान् सन्नाहः अपि करणीयः खलु? एतदर्थम् अनुज्ञादानेन अनुग्रहणीयाः वयम्" इति।

आत्मना यत् चिन्तितं तदेव मन्त्रिणा अपि उच्यमानम् अस्ति इति राज्ञः महदाश्चर्यम्। युवराज्ञीविषयकप्रीत्या मन्त्री एवं वदन् अस्ति इति चिन्तयति राजा। मन्त्रिणः राजभक्तिं मनसि एव प्रशंसन् राजा अङ्गीकारं सूचयन् मन्दहासपूर्वकं शिरः चालितवान्।

घोरान्धकारमय्यां रात्रौ आकाशः मेघैः आच्छन्नः आसीत्। तदा तदा तीक्ष्णा तडित्। पुनः मेघगर्जनम्। तडिता सह अशनिपातः अपि। कदाचित् बिन्दुमयी वृष्टिः। पुनः कदाचित् अजस्रवृष्टिः।

एतादृश्यां घोररात्र्यां मान्त्रिकः वीरविकटः कृष्णवर्णीयं वेषं धृत्वा उषःकालतः अपि पूर्वम् एव, रुद्रपुर्याः सीमाभागे स्थितं कालिकालयं प्रति स्ववाहनं भल्लूकम् आरुह्य गच्छन् अस्ति। आलयस्था कालिकामाता राजपरिवारस्य आराध्यदेवी। भक्तानाम् अभीष्टानां पूरयित्री चापि। किन्तु आलयः अरण्यप्राये प्रदेशे अस्ति इत्यतः तत्र सामान्यदिनेषु अधिकः जनसञ्चारः न भवति।

अर्चकः तु सूर्योदयानन्तरम् आगत्य यथाविधि पूजां समाप्य सूर्यास्तसमये गृहं प्रतिगच्छति स्म। यावत् अर्चकः भवति तदा एव तत्र जनानां गमनागमनम्। ततः पूर्वं तदनन्तरं वा तत्र कोऽपि न सञ्चरति।

एतस्मात् दुर्गालयात् शतव्यामदूरे अरण्यान्तर्गतः कश्चन विशालः उन्नतः च वटवृक्षः अस्ति। तस्य वटवृक्षस्य समीपं गत्वा मान्त्रिकः वीरविकटः भल्लूकात् अवतीर्य– "अये अत्रैव तिष्ठतु। इतः कुत्रापि न गन्तव्यम्" इति आज्ञास्वरेण उक्त्वा दुर्गामन्दिरम् उद्दिश्य गतवान्।

आलयस्य उन्नतस्य द्वारगोपुरस्य समीपे कश्चित् स्थितः दृश्यते स्म। तं पश्यन् उक्तवान् मान्त्रिकः– "मम आगमने अल्पः विलम्बः जातः यत् तदर्थम् अहं क्षन्तव्यः। मन्त्रवादिन्याः समीपं पुनरपि गत्वा आगतवान् अस्मि। सा एकं तायत्तं दत्तवती

अस्ति। तत् भवता धृतं चेत् भवति भयं किञ्चिदपि न भविष्यति। सर्वं मङ्गलमयं भविष्यति" इति।


"धन्योऽहं मान्त्रिकवर्य! धन्योऽहम्। मम मित्रं भवान् मान्त्रिकः यत् तत् मम सौभाग्यम्। भवतः उपकारम् आजीवनं स्मरामि" इति उक्त्वा सः अपरः वीरविकटं भक्त्या नमस्कृतवान्। एवम् उक्तवान् न अन्यः, अपि तु दुष्टः प्रधानमन्त्री एव।

वीरविकटः स्यूततः एकं तायकं बहिः आनीय मन्त्रिणः हस्ते बद्धवान्। 'तायकं यस्य हस्ते भवति सः भवतः आज्ञाधारी विनीतः भविष्यति' इति उक्तवती आसीत् वृद्धा मन्त्रवादिनी। एतत् अजानन् मन्त्री भक्त्या तत् तायकं धृतवान् आसीत्। एवं धारणेन आत्मानं धन्यं मन्यते स्म सः।

"जन्मदिनोत्सवदिने युवराज्ञी देव्याः दर्शनार्थम् अत्र आगमिष्यति खलु? अस्मदनुकूलः एव मुहूर्तः निश्चितः खलु भवता?" इति प्रधानमन्त्रिणं पृष्टवान् मान्त्रिकः।

"आम्। अस्मदनुकूलः एव मुहूर्तः निश्चितः। सूर्यास्तानन्तरं द्वितीययामतः उषःकालं यावत् उत्तमः मुहूर्तः अस्ति इति उक्तवान् अस्मि" इति उक्तवान् प्रधानमन्त्री।

"मुहूर्तदिने घोरः अन्धकारः भविष्यति। यतः स च कृष्णपक्षे भविष्यति। अतः एव



अस्मत्कार्यसाधनार्थम् अपि एषः एव योग्यः मुहूर्तः" इति गर्वेण हसन् उक्तवान् वीरविकटः।

"दैवानुग्रहकारणतः अस्माकम् अभीष्टं निर्विघ्नं सेत्स्यति इति मम विश्वासः। मुहूर्तः स्थलम् इत्यादिकं सर्वम् अपि अस्मदानुकूल्याय एव। देवालयस्य कुञ्चिका आनीता अस्ति मया। अपायात् रक्षणार्थं कार्यस्य साधनार्थं वा आलयस्थः सुरङ्गमार्गः उपयोक्तुं शक्यः इति खलु उक्तम् आसीत् मया? सुरङ्गद्वारस्य उद्घाटनं पिधानं च अहं जानामि एव। राजकुटुम्बेन एतस्य सुरङ्गमार्गस्य उपयोगः इतः पूर्वं न कृतः। इतः परम् अपि एतस्य उपयोगः न क्रियेत



तेन। किन्तु स च मार्गः इदानीम् अस्मदानुकूल्याय अभवत्। अन्तः गत्वा सुरङ्गमार्गं परीक्ष्य आगच्छाव वा?" इति पृष्टवान् मन्त्री।

"अथ किम्? तदर्थम् एव खलु इदानीम् आवाम् अत्र सम्मिलितौ?" इति उक्तवान् वीरविकटः।

मन्त्री आलयस्य द्वारम् उद्घाटितवान्। उभौ अपि अन्तः गत्वा द्वारं पिहितवन्तौ। मन्त्री दुर्गादेव्याः पुरतः स्थितात् दीपात् अन्यं दीपं ज्वालयित्वा प्रकाशं वर्धितवान्। देव्याः विग्रहस्य पृष्ठभागे भित्तौ विविधानि शिल्पानि दृश्यन्ते स्म।

मन्त्री दीपशिखां सज्जीकृत्य तानि शिल्पानि परीक्ष्य अपेक्षितं शिल्पम् अभिज्ञातवान्। अनन्तरं दीपं पार्श्वे संस्थाप्य शिल्पस्य मुखं गृहीत्वा उभयपार्श्वे बलात् आकृष्टवान्। तावता विग्रहस्य पृष्ठतः भूमौ सुरङ्गद्वारं दृष्टिगोचरं जातम्।


मन्त्री मान्त्रिकः च अन्धकारमये सुरङ्गे पदं स्थापितवन्तौ।

एतावत्पर्यन्तं रहसि तयोः अनुसरणं कृतवान् अपूर्वः इदानीं चिन्तितवान् यत् सुरङ्गद्वारस्य पिधानं करिष्यामि इति। किन्तु 'दुष्टौ सुरङ्गस्य अपरद्वारेण पलायनं कर्तुम् अर्हतः एव' इति स्मृत्वा पूर्वतनं चिन्तनं परित्यक्तवान्। 'सुरङ्गस्य अपरं द्वारं कुत्र इति न ज्ञायते। अतः अहम् अपि तौ अनुसृत्य सर्वं ज्ञास्यामि' इति आलोच्य अपूर्वः यावत् एकं पदम् अग्रे स्थापितवान् तावता सुरङ्गद्वारं सशब्दं पिहितम् अभवत्। सुरङ्गद्वारस्य पिधानार्थम् अन्तर्भागे एव काऽपि व्यवस्था परिकल्पिता इति भाति इति आलोचितवान् अपूर्वः।

'आलयस्य द्वारं न कीलितम्। अतः मन्त्री मान्त्रिकः च मन्दिरसमीपं पुनः आगमिष्यतः इति तु निश्चितम्। इदानीं तयो प्रतीक्षणात् ऋते नान्या गतिः' इति आलोच्य अपूर्वः मन्दिरतः बहिः आगत्य स्तम्भस्य पृष्ठतः कोणे उपविष्टवान्।

एकघण्टानन्तरं मन्त्री मान्त्रिकः च आलयतः बहिः आगतवन्तौ। मन्त्री द्वारं पिधाय कीलयन् मान्त्रिकम् उक्तवान्—





"अहम् उपायेन युवराज्ञीं सुरङ्गमार्गस्य अन्तः नोदयिष्यामि। मया सूचितस्य क्रमस्य अनुगुणं झटिति द्वारस्य पिधानं भवतः कार्यम्। अनन्तरं भवान् सुरङ्गमार्गेण युवराज्ञीम् अरण्यमध्यं नीत्वा भवत्पक्षीयाणाम् अधीनां करोतु। ते च तां मन्त्रवादिन्याः समीपं नयन्तु" इति।

"सुरङ्गस्य अपरपार्श्वे मत्पक्षीयः अन्यः कोऽपि न भवति। स्वयं मन्त्रवादिनी एव तत्र तिष्ठति। शुकशावकं गृध्रः इव युवराज्ञीं लीलया गृहीत्वा नेष्यति सा" इति उक्तवान् मान्त्रिकः वीरविकटः।

"साधु, कार्यं यावच्छीघ्रं समाप्यते तावत् वरम्। यतः विनोदकार्यक्रमेषु जनाः मग्नाः भवन्ति चेदपि राजकुमार्याः अदर्शनं क्षणमात्रेण तस्याः सखीभिः ज्ञायते एव। अनन्तरं सर्वे तस्याः अन्वेषणार्थम् उद्युक्ताः भवन्ति। अतः कार्यसाधने विशेषजागरूकता आवश्यकी" इति उक्तवान् मन्त्री।

"सर्वे अन्वेषणार्थम् उद्युक्ताः भवन्तु नाम। किन्तु राजकुमारी सुरङ्गमार्गेण नीयमाना अस्ति इति तु केनापि न ज्ञायते खलु? गर्भगृहे तादृशः मार्गः अस्ति इति जानन्तः अपि विरलाः स्युः। जानन्तः अपि यावत् स्मरेयुः तावता अस्माकं कार्यं समाप्तं भविष्यति" इति उक्तवान् वीरविकटः।

"रहस्यमार्गस्य विषयं तु राजा, राज्ञी, सेनापतिः, देवालयस्य प्रधानार्चकः, अहं च जानीमः। अन्यः कोऽपि सर्वथा न जानाति" इति उक्तवान् मन्त्री।

"प्रधानार्चकः अपि सुरङ्गमार्गं जानाति? तर्हि कष्टम् आपतितम्। सः कथमपि अस्माकम् उपायं ज्ञात्वा महाराजं निवेदयति चेत् का गतिः?" इति आतङ्केन उक्तवान् वीरविकटः।

"सत्यं खलु? एषः अंशः इतः पूर्वं मया न लक्षितः एव। किं करणीयम् इदानीम्?" इति चिन्तामिश्रितेन स्वरेण उक्तवान् मन्त्री।

"सायङ्काले युवराज्ञ्याः आगमनतः पूर्वम् एव अर्चकः मन्दिरम् आगमिष्यति खलु? तदा एव तं परलोकं प्रति प्रेषयिष्यामः। अहम् एव अर्चकवेषं धृत्वा युवराज्ञीं देवालयस्य अन्तः

नेष्यामि। विग्रहप्रदक्षिणं पुण्याय इति उक्त्वा तां प्रदक्षिणार्थं प्रेरयित्वा यदा सा विग्रहस्य पृष्ठतः आगमिष्यति तदा सुरङ्गस्य अन्तः नोदयित्वा झटिति अहम् अपि अन्तः प्रविश्य सुरङ्गद्वारस्य पिधानं करिष्यामि" इति उक्तवान् वीरविकटः।

"योजना तु उत्तमा अस्ति। किन्तु एतदर्थम् अर्चकस्य प्राणाः अपहरणीयाः एव वा? अन्यः मार्गः नास्ति वा? अर्चकः तु उत्तमस्वभावयुक्तः। तस्य प्राणानाम् अपहरणं पापाय स्यात्" इति उक्तवान् मन्त्री।

"भवान् एवं भीरुः चेत् भाविनि काले भूमण्डलस्य शासनं कथं वा कुर्यात्? कार्यं साधनीयं चेत् यत्किमपि कर्तुं मनः सिद्धं स्यात्। अथवा अस्तु तावत्, भवतः इच्छायाः अनुगुणम् एव भवतु। अर्चकं कुत्रापि रहस्यस्थाने बन्धने स्थापयाम। भवतु खलु? इदानीं गच्छाव तावत्" इति उक्त्वा वीरविकटः वटवृक्षस्य समीपं गतवान्। मन्त्री तस्य अनुज्ञां प्राप्य ततः नगरं प्रति प्रस्थितवान्।

एतावत्पर्यन्तं स्तम्भस्य पृष्ठतः स्थित्वा सम्भाषणं शृण्वन् स्थितः अपूर्वः 'इदानीं कः अनुसरणीयः' इति क्षणकालम् आलोचितवान्।

'एतयोः दुस्तन्त्रं किम् इति तु सम्यक् ज्ञातम्। इतः परम् एतयोः अनुसरणेन किमपि प्रयोजनं नास्ति। अतः राजानं सर्वं निवेदयामि चेदेव वरं स्यात्। तदा तु दुस्तन्त्रस्य निवारणार्थं योग्यः उपायः अनुसर्तुं शक्येत। राजा कीदृशं मार्गम् अनुसरति इति ज्ञात्वा मया मदीयः मार्गः निश्चेतव्यः। अन्यद्वारा कारयितुं न शक्तं चेदेव मया प्रवर्तितव्यं, न अन्यथा। केनापि उपायेन एतत् कुतन्त्रं विफलीकरणीयम् इति तु निश्चितम् एव। विश्वकर्ममहाराजः मया कथं सूचनीयः? मम वचनेषु सः विश्वासं कथं प्राप्नुयात्?' इत्येवं गभीरचिन्तनं कुर्वन् स्थितवान् अपूर्वः।

—(अग्रिमसञ्चिकायां समाप्यते।)






## १३


(रुद्रपुर्याः युवराज्ञयाः कण्ठे स्थितं चन्द्रकान्तमणियुक्तं हारम् अपहर्तुं दुष्टः मन्त्री मान्त्रिकः च योजनां कृतवन्तौ। युवराज्ञी सजीवं मह्यम् अर्पणीया इति मान्त्रिकम् आज्ञापितवती मन्त्रवादिनी। दुर्गामातुः मन्दिरम् आगतां युवराज्ञीं सुरङ्गमार्गेण नीत्वा अपहरणीया इति मान्त्रिकादीनां चिन्तनम्। तच्च अपूर्वेण ज्ञातम्। तदनन्तरम्.....)

राजकुमार्याः जन्मदिनोत्सवः आसन्नः अस्ति। 'दुष्टः मन्त्री मान्त्रिकः च यत् दुस्तन्त्रं रचितवन्तौ तत् राजानं निवेदयितुं योग्यः जनः समीरः एव' इति आलोच्य अपूर्वः समीरसमीपं गतवान्।

अपूर्वं दृष्ट्वा समीरः नितरां सन्तुष्टः। अपूर्वेण यत् उक्तं तत् श्रद्धया श्रुतवान् सः। 'भवतः आशयस्य अनुगुणम् अहं राजानं सर्वं निवेदयिष्यामि' इति उक्त्वा अपूर्वेण सह प्रस्थितवान् समीरः।

सा च घोररात्रिः। तस्यां मान्त्रिकः वीरविकटः रहस्यरूपेण मन्त्रिणः गृहं गत्वा द्वारताडनं कृतवान्। मन्त्री वीरविकटं दृष्ट्वा आश्चर्येण पृष्टवान्– "मित्र! किम् एतत्? मध्यरात्रसमये भवतः आगमनं किमर्थम्?" इति।

"मम आगमनं सदा रात्रौ एव खलु? दिने मम आगमनं कदापि दृष्टवान् वा भवान्?"



इति उपहासपूर्वकं पृष्टवान् वीरविकटः।

''कोपः मास्तु श्रीमन्! भवदागमनं दृष्टवतः मम मनसि भावः आगतः यत् काऽपि आपत् आपतिता स्यात् इति। तया भीत्या मया पृष्टम्'' इति उक्तवान् मन्त्री।

''आम्। आपत् उपस्थिता अस्ति। अस्माकं रहस्यतन्त्रं केनापि ज्ञातम् अस्ति इति भावयति मम गुरुः मन्त्रवादिनी। अस्माकं व्यवहारं कोऽपि रहसि परिशीलयन् अस्ति इति वदति सा। मम तु प्रश्नः– कथम् एतस्य सम्भवः इति'' इति उक्तवान् वीरविकटः।

''एतत् तु सर्वथा असम्भाव्यम्। मन्त्रवादिन्याः कोऽपि भ्रमः स्यात्'' इति उक्तवान् मन्त्री।

''भवान् मन्त्रवादिन्याः सामर्थ्यं न जानाति। सा निराधारं कदापि सन्देहं न प्रकटयति। भवान् एतं रहस्यविचारं पत्नीं प्राणसमं मित्रं वा कदाचित् उक्तवान् वा? सम्यक् स्मृत्वा वदतु'' इति उक्तवान् मान्त्रिकः।

''नैव। मया कोऽपि न उक्तः। मैत्रीनाम्ना शपे यत् मन्मुखात् रहस्यस्फोटनं कुत्रापि न जातम् इति'' इति दृढस्वरेण उक्तवान् मन्त्री।

''भवति मम दृढः विश्वासः अस्ति एव। तथापि जागरूकताविषये कदापि औदासीन्यं न प्रकटनीयम्। विश्वासार्हान् भटान् राजप्रासादं परितः रक्षणकार्ये नियोजयतु। रक्षणकार्यम् अहोरात्रं प्रचलेत्। नूतनः कोऽपि राजानं न पश्येत्। एषा विशेषरक्षणव्यवस्था किमर्थं कृता इति कोऽपि न जानीयात्। यदि कोऽपि कारणं पृच्छति तर्हि भवान् वदतु यत् अपायसम्भावनावार्ता आगता इत्यतः एषा व्यवस्था कृता इति'' इति उक्त्वा ''सदा जागरूकता भवतु'' इति पुनः पुनः उक्त्वा ततः निर्गतवान्।

मान्त्रिकस्य वचनस्य अनुगुणं मन्त्री प्रातः एव राजभवनं परितः रक्षणार्थं विश्वासार्हान् भटान् योजितवान्।

समीरः राजदर्शनं प्राप्तुं प्रयत्नं कृतवान्। किन्तु तदर्थं तेन अनुमतिः न प्राप्ता। समूहे

प्रविश्य कथमपि कार्यं साधयिष्यामि इति चिन्तयित्वा तेन प्रयत्नः कृतः। किन्तु तत्रापि असाफल्यम् एव।

युवराज्ञ्याः जन्मदिनोत्सवः प्राप्तः अस्ति। दुष्टेन मान्त्रिकेण, मन्त्रिणा, मन्त्रवादिन्या च मिलित्वा यत् कुतन्त्रम् आयोजितं तत् कथमपि राजानं वक्तुं न शक्तवान् अपूर्वः। एतस्य साधनं कथम् इत्येव चिन्ता अपूर्वस्य।

'राजा प्रतिदिनं भवनस्य चन्द्रशालायां स्थित्वा सूर्यास्तस्य सौन्दर्यं पश्यति' इति अपूर्वं सूचितवान् समीरः। अपूर्वः चन्द्रशालां दृष्टवान्। तत्र राजा दृष्टः तेन।

अपूर्वः एकस्मिन् तालपत्रे दुष्टानां दुस्तन्त्रं संक्षेपेण निरूप्य 'युवराज्ञ्याः प्रधानार्चकस्य च रक्षणार्थं विशेषव्यवस्था करणीया, युवराज्ञी कदाचित् अपि विग्रहस्य पृष्ठभागं न गच्छेत्' इति लिखित्वा अनतिदूरे स्थितं गृध्रम् आहूतवान्। गृध्रः अपूर्वस्य समीपम् आगत्य पत्रं मुखेन गृहीत्वा वेगेन राजप्रासादम् उद्दिश्य अगच्छत्।

तालपत्रं मुखेन गृहीत्वा डयमानं गृध्रं दृष्ट्वा उत्साहं प्राप्य कश्चन भटः गृध्रं लक्ष्यीकृत्य एकं बाणं प्रयुक्तवान्। बाणः गृध्रे तु न लग्नः। भीतः गृध्रः ततः अन्यस्यां दिशि अधावत्।


एवं भीत्या धावतः गृध्रस्य मुखात् तालपत्रं च्युतं सत् जलेन पूर्णायां परिखायाम् अपतत्। भटेन कृतं बाणप्रयोगं, गृध्रस्य धावनं, पत्रस्य




पतनं वा अपूर्वः समीरः वा न दृष्टवन्तौ। 'गृध्रेण राज्ञे पत्रम् अर्पितम्। युवराज्ञ्याः रक्षणार्थं राजा व्यवस्थां करिष्यति' इति चिन्तयित्वा तौ निश्चिन्तौ जातौ।

उषसि एव जन्मदिनोत्सवनिमित्तकाः विविधाः कार्यक्रमाः आरब्धाः। विविधाः प्रमुखाः, अन्यान्यदेशेभ्यः समागताः राजप्रतिनिधयः, परिवारसदस्याः च युवराज्ञीं दृष्ट्वा शुभाशंसनं कृतवन्तः। समीरः तु जनानां मध्ये सञ्चरन् वार्ताः सङ्गृह्य अपूर्वं निवेदयन् अस्ति।

सायङ्कालसमये युवराज्ञी आलयं प्रति गन्तुं सिद्धा जाता। युवराज्ञीम् अनुसृत्य सहस्रशः जनाः आनन्देन प्रस्थितवन्तः।



राजप्रासादस्य बर्हिभागम् आगत्य राजा युवराज्ञी च जनानां शुभाशंसनं स्वीकृतवन्तौ। राज्ञः मुखे कोऽपि आतङ्कभावः न दृष्टः अपूर्वेण। 'एवं तर्हि मया प्रेषितं पत्रं राज्ञा कथमपि न प्राप्तम्' इति तर्कितवान् अपूर्वः। इदानीं का अन्या गतिः, ऋते गुरुस्मरणात्?

एवम् एव सन्ध्याकालः अतीतः। सखीगणपरिवृता युवराज्ञी परिवारसमेतः राजा च शोभायात्रया दुर्गामन्दिरं प्रति प्रस्थितवन्तौ।

'गृध्रद्वारा प्रेषितं तालपत्रं व्यर्थं जातम्' इत्यत्र सन्देहः न अवशिष्टः। किङ्कर्तव्यतामूढः अपूर्वः चिन्ताक्रान्तः सन् समीरेण सह आलयं प्रति प्रस्थितवान्।

आनन्दतुन्दिला युवराज्ञी सखीभिः सह आलयप्राङ्गणं प्रविष्टवती। अर्चकवेषधारी मान्त्रिकः शिष्यैः सह आगत्य आदरेण तां स्वागतीकृत्य अन्तः नीतवान्। युवराज्ञी देव्याः विग्रहस्य पुरतः स्थित्वा करौ योजयित्वा भक्त्या नमस्कारं कृतवती। अर्चकः कमपि मन्त्रं मन्दं जपन्– "वत्से! भक्ताभीष्टप्रदायिनी देवी प्रदक्षिणपूर्वकं नमस्कृता चेत् मङ्गलं भविष्यति। आगच्छतु, प्रदक्षिणं करोतु" इति उक्त्वा अग्रे प्रस्थितवान्। युवराज्ञी तम् अनुसृतवती।

"युवराज्ञ्याः ऋते कोऽपि अग्रे न गच्छेत्। युवराज्ञीद्वारा काश्चन विशेषपूजाः कारणीयाः सन्ति। भवत्यः सर्वाः मौनम् अत्रैव तिष्ठन्तु" इति युवराज्ञ्याः सखीः उक्त्वा अग्रे प्रस्थितवान् अर्चकवेषधारी मान्त्रिकः।

अर्चकस्य वचनं विरोद्धुम् अशक्ताः परिचारिकाः मौनं तत्रैव स्थितवत्यः।

वञ्चकार्चकस्य शिष्यौ उच्चैः मन्त्रोच्चारणं कृतवन्तौ। घण्टानादः कृतः। अन्यानि वाद्यानि वादितानि। वाद्यादि-ध्वनिकारणतः बहिः स्थितः कोऽपि अन्तः किं प्रवर्तते इति ज्ञातुं न शक्नोति स्म।

युवराज्ञी यदा गर्भगृहस्य पृष्ठभागं गतवती तदा अर्चकवेषधारी मान्त्रिकः तां बलात् गृहीत्वा सुरङ्गमार्गे नुत्वा झटिति स्वयमपि

सुरङ्गमार्गं प्रविश्य सुरङ्गद्वारं पिहितवान्।

राजपरिवारः गर्भगृहात् बहिः एव आसीत्। सर्वं सुसूक्ष्मं परिशीलयन् स्थितः समीरः जनानां मध्यतः वेगेन अग्रे आगत्य उच्चस्वरेण उक्तवान्– "प्रभो, अनिष्टं प्रवृत्तम्। युवराज्ञी दुष्टैः अपहृता। अहो, वञ्चना! अहो, वञ्चना!" इति।

राजा आश्चर्येण तं दृष्टवान्।


"प्रभो, अहं समीरः। मां स्मरति खलु भवान्? युवराज्ञी मान्त्रिकेण अपहृता। मम वचने विश्वसितु कृपया। युवराज्ञी अपहृता" इति उक्तवान् समीरः।

"युवराज्ञी देव्याः आलयं प्रविष्टा अस्ति। तस्याः अपहरणं कथं सम्भाव्यते भवता?" इति पृष्टवान् राजा।

"प्रभो, विवरणार्थं न एषः समयः। युवराज्ञी आलये नास्ति। सुरङ्गमार्गेण नीयमाना अस्ति सा" इति उक्तवान् समीरः।

"एवं वा? मम पुत्री दुष्टैः अपहृता? कथम् एतत्" इति वदन् राजा आलयस्य अन्तः गतवान्। तम् अनुसृत्य गत्वा गर्भगृहे कुत्रापि युवराज्ञीम् अदृष्ट्वा परिचारिकाः उच्चैः आक्रन्दनं कृतवत्यः– "हा हन्त! युवराज्ञी नास्ति अत्र! अहो, अपहृता सा।" इति।

अत्रान्तरे धावनोद्यतान् मान्त्रिकशिष्यान् पश्यन् उच्चैः उक्तवान् समीरः– "प्रभो, वञ्चकान् एतान् बध्नन्तु" इति। भटाः तान् बद्धवन्तः।




"प्रभो, शीघ्रातिशीघ्रं सुरङ्गस्य अपरस्य द्वारस्य समीपं गन्तव्यम् अस्माभिः। विलम्बः न करणीयः" इति उक्तवान् समीरः।

राजा, सेनानायकः, समीरः, समर्थाः केचन भटाः च त्वरया अश्वम् आरुह्य गच्छन्तः अरण्यमध्ये स्थितं सुरङ्गस्य अपरद्वारं प्राप्तवन्तः।

समीरः अश्वात् अवतरन् सेनानायकम् उक्तवान्– "तत्र दृश्यते खलु वृद्धा? मन्त्रवादिनी सा परमदुष्टा। बध्नन्तु ताम्" इति।

"अहो धाष्ट्र्यम्! माम् अपि बन्द्धुं प्रयत्नः वा भवताम्? कदापि न शक्यम् एतत्! भवतः सर्वान् क्षणमात्रेण भस्मीकरिष्यामि" इति



उक्त्वा विकृताकारा मन्त्रवादिनी उच्चैः अट्टहासं कृतवती।

वृक्षशाखायां स्थितायाः मन्त्रवादिन्याः विकटं घोरम् अट्टहासं श्रुत्वा भीताः सर्वे परिवृत्य दृष्टवन्तः।

"अये! वृद्धे! निश्चलं तिष्ठतु। अन्यथा भवती एव भस्मसात् भविष्यति" इति तीक्ष्णः गम्भीरश्च कश्चन स्वरः अन्यतः श्रुतः।

इदानीं सर्वेषां दृष्टिः स्वरस्य दिशि गतः। तत्र कश्चन दिव्यः तेजस्वी मुनिपुङ्गवः स्थितः आसीत्। मुनिं दृष्ट्वा समीरः झटिति अग्रे गत्वा मुनिं साष्टाङ्गं नमस्कृत्य- "काऽपि अपरिहार्या समस्या आगता चेत् भवान् स्वयम् उपस्थितः भविष्यति इति अपूर्वेण उक्तम् आसीत्" इति उक्तवान्।

तदा सदानन्दमुनिः मन्दहासपूर्वकम् उक्तवान्- "आं, भवतः वचनं सत्यम् एव। ध्यानमग्नः एव अहम् अपूर्वस्य आह्वानं श्रुत्वा अत्र आगतः। तत्र दृश्यमाना मन्त्रवादिनी न सामान्या। सा महाशक्तिशालिनी, परमदुष्टा, क्रूरातिक्रूरा च। सा अन्येषां यौवनं वशीकृत्य कानिचन शतकानि यावत् जीवितुं समर्था। इदानीं युवराज्ञ्याः यौवनम् अपहृत्य स्वयं पुनर्यौवनं प्राप्तव्यम् इति सा योजनां कृतवती अस्ति। तस्याः अन्तिमक्षणः सन्निहितः। तस्याः सर्वाः शक्तीः नाशितवान् अस्मि" इति।

तदा मन्त्रवादिनी- "अये, मुनिवराक! मम सर्वाः शक्तीः नाशयितुं सामर्थ्यं नास्ति भवतः। मम वशे अन्या शक्तिः अवशिष्टा एव" इति उक्त्वा अग्रे किमपि वक्तुम् अशक्नुवती उच्चैः आर्तनादं कृत्वा विकटं हसन्ती अट्टहासं कुर्वती भस्मसात् जाता।

एतत् दृश्यं दृष्ट्वा राजा चकितः सन् सदानन्दमुनिं साष्टाङ्गं नमस्कृत्य गद्गदस्वरेण पृष्टवान्- "महात्मन्! मम पुत्री कुशलिनी खलु?" इति।

"अपूर्वस्य का गतिः जाता? सः कुत्रापि न दृश्यते खलु?" इति आतङ्केन उक्तवान् समीरः।

"युवराज्ञी अपूर्वश्च कुशलिनौ। आत्मनः नाशः सन्निहितः इति यदा ज्ञातं तदा मन्त्रवादिनी मान्त्रिकं मन्त्रबलेन सूचितवती।


मान्त्रिकः युवराज्ञ्याः कण्ठे स्थितं चन्द्रकान्तमणिं बलात् वशीकृत्य युवराज्ञीम् एव बलिरूपेण अर्पयित्वा आत्मनः रक्षणार्थं प्रयत्नं कृतवान्। किन्तु अत्रान्तरे अपूर्वः मायया गुहां प्रविश्य मान्त्रिकेण सह युद्धं कृत्वा मान्त्रिकं बन्धने स्थापितवान्। इदानीम् अपूर्वः युवराज्ञ्या सह अत्र आगच्छन् अस्ति'' इति उक्तवान् सदानन्दमुनिः।

अत्रान्तरे वटवृक्षस्य समीपे भूमेः अधोभागतः मेघगर्जनसदृशः शब्दः श्रुतः। सर्वेषु पश्यत्सु, कश्चन दिव्यः पुरुषः सुरङ्गद्वारात् बहिः आगत्य बद्धहस्तं वीरविकटम् आकृष्य आनीतवान्। मान्त्रिकः वीरविकटः तु शिरः अवनमय्य स्थितवान् आसीत्। तं दिव्ययुवकम् अनुसृत्य युवराज्ञी अपि आगता। पितरं दृष्ट्वा सा समन्तोषं पितुः पार्श्वे स्थितवती।

युवकः मुनिं साष्टाङ्गं नमस्कृतवान्। तदा मुनिः तं प्रीत्या स्पृशन्– ''वत्स! अपूर्व! मानवाकारं प्राप्तुं योग्यः समयः आसीत् एषः। तदनुगुणम् आकारः प्राप्तः अस्ति भवता। इतः परम् एषः आकारः स्थिरतया स्थास्यति'' इति उक्त्वा आशीर्वादेन अनुगृहीतवान्।

''तात! अपायात् मां रक्षितवान् एषः एव'' इति अपूर्वं प्रदर्शयन्ती पितरं साभिमानम् उक्तवती युवराज्ञी।

''मित्र! दीर्घायुष्मान् भवतु भवान्। महान् उपकारः कृतः भवता'' इति अपूर्वम् उक्तवान् राजा।



"यदर्थम् अहम् आगतवान् तत् कार्यं सम्पन्नम्। अहम् गच्छामि तावत्" इति उक्तवान् सदानन्दमुनिः।

"मम कर्तव्यम् अपि समाप्तम् एव। अहम् अपि भवता सह आगच्छामि तावत्" इति उक्तवान् अपूर्वः।

"वत्स! भवतः कर्तव्यं न समाप्तम्। अग्रे यत् करणीयम् अस्ति तस्य साधनार्थं भवता एतत् मानवरूपं प्राप्तम् अस्ति। एतावत्पर्यन्तम् अल्पं रूपं प्राप्य अपि यथा धैर्येण साहसेन च व्यवहरन् परोपकारं भवान् कृतवान्, तथैव इतः परम् अपि करणीयम् अस्ति भवता। प्रजानायकत्वेन भवतः कर्तव्यम् इतोऽपि करणीयम् अस्ति" इति हसन् उक्तवान् मुनिः।

"कथं शक्यम् एतत्?" इति सन्देहपूर्वकं पृष्टवान् अपूर्वः।

"एतत्क्षणतः मदीयम् एतत् राज्यं भवदधीनं भावयतु। मम पुत्री यदि भवतः प्रिया स्यात् तर्हि भवन्तं जामातरं कर्तुम् अहं ससन्तोषं सिद्धः अस्मि। राजकुमारी परिणीता चेत् तस्याः मातुलस्य लावण्यपुर्याः अधिपतिः अपि भवान् एव भविष्यति। एतत्सर्वं पूज्यानाम् अनुमतम् एव भवेत् इति भावयामि अहम्" इति उक्तवान् राजा।

अपूर्वः युवराज्ञीं दृष्टवान्। युवराज्ञी लज्जया शिरः अवनमय्य हसन्मुखी स्थिता आसीत्। सदानन्दमुनिः अपूर्वं युवराज्ञीं च स्वसमीपम् आहूय उभयोः अपि करं परस्परं योजयित्वा– "सदा लोकहितम् एव चिन्तयन्तौ भवन्तौ आदर्शदम्पती भवताम्। भवतोः जीवनं सार्थकं भवतु" इति आशिषा अनुगृह्य ततः अदृश्यः अभवत्।

राजा दुष्टं मान्त्रिकं तच्छिष्यान् च कारागारे स्थापितवान्। अपूर्व-युवराज्ञ्योः विवाहः शुभे मुहूर्ते सवैभवं सम्पन्नः। राजा समग्रं राज्यम् अपूर्वाधीनं कृतवान्। अपूर्वः समीरं मन्त्रिपदे नियोज्य न्याय्येन मार्गेण राज्यं पालयन् 'प्रजारञ्जकः' इति कीर्तिं प्राप्तवान्। –(समाप्तम्)

